देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

# रघुनाथवार्तावली

## केन्द्रीयविश्वविद्यालयोद्घाटनविशेषाङ्कः

पञ्चमवर्षम् (अङ्काः 15,16,17,18) जनवरी-मार्च, अप्रैल-जून, जुलाई-सितम्बर, अक्टूबर-दिसम्बर 2020




नानाविषयसम्बद्धाः नानारसपरिप्लुताः।
परिसरीयवार्तास्ताः वार्तावल्यां प्रकाशिताः।।
रघुनाथवार्तावली कृपया श्रीरघुनाथस्य प्रसरेत्।।
दिशि दिशि प्रापयेदथ वार्ताः परिसरस्याभिनवाः।।

प्रकाशनवर्षम् - 2021

**प्रधान-सम्पादकः**

प्रो. बनमालीबिश्वालः

(परिसर-निदेशकः)

**सम्पादकः**

डॉ.अनिलकुमारः

**संपादकमण्डलम्**

डॉ.शैलेन्द्रप्रसादउनियालः

डॉ.श्रीओमशर्मा

डॉ.सुरेशशर्मा

डॉ.दिनेशचन्द्रपाण्डेयः

श्रीपंकजकोटियालः

**लिपिचित्रसंयोजनम्**

श्रीनवीनकुमारः


रघुनाथवार्तावली-समबद्धमभिप्रायम्, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित—ईमेल् संकेतेन प्रेषयन्तु -

srkvarta@gmail.com

**परिसरस्य जालपुटेऽपि रघुनाथवार्तावली द्रष्टुं शक्यते-**

Website: http//csu-devprayag.edu.in/


देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तावली

Website: http//csu-devprayag.edu.in/

# रघुनाथवार्तावली

प्रकाशकः

केन्द्रीय-संस्कृत-विश्वविद्यालय

श्रीरघुनाथकीर्तिपरिसरः

देवप्रयागः, पौडी-गढवालः

उत्तराखण्डः - 249 301

(दूरभाषः - 01378—266028)

Email : srkcampus@gmail.com

Website : http//csu-devprayag.edu.in/


# पुरोवाक्



प्रो.बनमालीबिश्वालः

यदा देवप्रयागेऽस्मिन् परिसरः प्रतिष्ठितः।
वार्तावली च तत्कालात् नियमितं प्रकाश्यते ।1।
अङ्काश्चतुर्दशाः पूर्वं यथाकालं प्रकाशिताः।
कीर्तिञ्च रघुनाथस्य दिक्षु प्रसारयन्ति ये ।2।
बिश्वालो बनमाली च गडपालस्तथाऽनिलः।
यथाकालञ्च पूर्वाङ्कान् सोत्साहं समपादयन्।।
एवं हि वर्तमानाङ्को संयुक्तो वै प्रकाश्यते।
चत्वारोऽङ्काश्च सम्बद्धाः सन्त्येकविषयेन वै ।3।
पञ्चदशं समारभ्य यावदष्टादशान्तकम्।
प्रातिनिध्यञ्च वर्षस्य कुर्वन्ति सफलन्तु ते ।4।
राष्ट्रिय-संस्कृताख्यञ्च संस्थानं यदवर्तत।
तत् केन्द्रीय-संस्कृताख्यो विश्वविद्यालयोऽभवत् ।5।
तद्वदन्यौ च केन्द्रीयौ विश्वाविद्यालयौ नवौ।
तयोरेकोऽस्ति दिल्ल्याञ्च भिन्नस्तिरुपतौ पुनः ।6।
विश्वविद्यालयो नोऽस्ति संस्कृताय समर्पितः।
केन्द्रीय-संस्कृताख्यस्तु परिसरैस्समन्वितः ।7।
सन्ति परिसराः नैकास्तस्य समग्रभारते।
अत एवास्य वैशिष्ट्यं नूनं भातीह भूतले ।8।
कश्चित् पुर्यां प्रयागे च त्रिशूरे लक्ष्मणे पुरे।
जम्मौ जयपुरे चैव श्रृङ्गेर्यां गरलौ तथा ।9।
भोपालेऽगरतालायां क्वचिद्देवप्रयागके।
कश्चित्परिसरोऽप्यस्ति मुम्बईनगरे पुनः ।10।
श्रीक्षेत्रे चोत्कले कश्चित् परिसरस्सदाशिवः।
जगन्नाथ-प्रसादाच्च संस्कृतरक्षणे रतः ।11।
इलाह्बादे प्रयागे वा प्रयागराज-संज्ञके।
गङ्गानाथाभिधश्चास्ति शोधाय वै समर्पितः ।12।
गुरुवायुस्त्रिशूरे च जम्मौ रणविरस्तथा।
त्रिपुरास्वेकलव्यश्च वेदव्यासो हिमाचले ।13।
परिसरस्त्रयोदशो भाति देवप्रयागके।
कीर्त्यन्तः रघुनाथस्तु नाम यस्य प्रसिद्ध्यति ।14।
नवपरिसरश्चायं संस्थानस्य मनोरमः।
प्रवाहयति राष्ट्रेऽस्मिन् संस्कृतजाह्नवीं नवाम् ।15।
वेद-वेदान्त-साहित्य-न्याय-व्याकरणादयः।
समेऽप्युद्घाटिताश्चैषु विभागाः ज्योतिषादयः ।16।
तदर्थमभिनन्द्योऽस्ति शिक्षामन्त्रि-महोदयः।
नाम्ना रमेशचन्द्रो यो निश्शङ्कश्चोपसंज्ञकः ।17।
पोखरियेति वंशे यस्सदाचारी ह्यजायत।
शिक्षामन्त्रीपदे चासौ कालान्तरे प्रतिष्ठितः ।18।
शिक्षा प्रारम्भिकी तस्य संस्कृते समजायत।
सुसंस्कारास्स्वतस्तस्य जीवने सम्प्रवर्तिताः ।19।
विशेषाङ्कश्च तन्नाम्ना मुदाऽस्माभिस्समर्प्यते।
कीर्तीरमेशचन्द्रस्य वर्धतां राष्ट्रनन्दिनी ।20।

# संपादकीयम्

सर्वा बाधां हरेन्नित्यं रघुनाथो महामुनिः।
नाथानामपि यो नाथः कुर्यात्सदा स मङ्गलम्।।1।।
तस्यैव कृपया नूनं शोभते भुवनत्रयम्।
वार्ता चेयं समायाता भवतां पुरतोऽधुना ।।2।।
पुर्यां छात्राः यथा भान्ति ग्लोरीमहोत्सवे पुरा।
शास्त्रेऽपि ते समायाता अगरनगरे तथा। ।3।।
युवमहोत्सवे येषां कीर्तिश्च शोभते सदा।
तैरेव वन्दिता सम्यक् सर्वशुक्ला सरस्वती ।।4।।
गणतन्त्रे यथा गानं गीयते भारतेऽखिले।
मातृभाषायुतो भाति परिसरस्तथैव च।।5।।
सङ्गोष्ठीषु समायाताः विद्वांसो भारतस्य ये।
व्याख्यानमिह शास्त्रज्ञैः प्रदत्तं नूतनं महत्।।6।।
सर्वदर्शनवेदान्तव्याकरणादिषु नवम्।
साहित्यवेदयोर्नित्यं चिन्तनमद्भुतं कृतम् ।।7।।
बहुभाषायुतं भाति कविसम्मेलनं शुभम्।
कविता नूतना गीताः कविभिश्चाभिवन्दितैः ।।8।।
कोरोनापीडिताः सर्वे यतो विश्वस्य मानवाः।
चिन्तयामि कथं नश्येद्बाधेयं दुःखदायिनी ।।9।।
तस्मात्सर्वैः कृतं नूनमन्तर्जालेन पाठनम्।
निरामयश्च योगेन परिसरो विभाति नः ।।10।।
अवशेषे समाप्ते च समे छात्राः सुमानसाः।
पठनाय समायाताः परिसरे शुभप्रदे ।।11।।
स्वातन्त्र्ये यथा जाता धन्या वयं च भारते।
परिसरे तथा सर्व समुत्साहेन दृश्यते ।।12।।
राष्ट्रचेतनया सर्वे कवयोऽत्र समागताः।
काव्यञ्च श्रावितं पुण्यं रसेन सुमनोहरम् ।।13।।
उत्तराखण्डराज्येन शिक्षानीतिश्च नूतना।
समायोजिता सर्वेषां भाति यत्र च मङ्गलम् ।।14।।
सप्ताहश्च यदा जातः संस्कृतस्य महान् शुभः।
कार्यक्रमाः कृतास्तत्र छात्राणां विदुषान्तथा ।।15।।
गणनाथस्य पूजाऽथ कृता सर्वैश्च मोक्षदा।
तया सञ्जायते विश्वे शान्ति-विधायिनी दशा ।।16।।
हिन्दीपक्षे च सर्वेषां दृश्यते चिन्तनं महत्।
कार्यक्रमे विदुषां वै छात्राणां सुमनोहरे ।।17।।
परीक्षा सफला जाता छात्राणां यन्महद्बलम्।
व्याख्याने द्वे विशिष्टे च परिसरेण कल्पिते ।।18।।
स्वच्छ-भारतनाम्ना च योजना परिपालिता।
स्वाध्यायकेन्द्रसंयुक्ते परिसरे शुभान्विते ।।19।।
केन्द्रीयत्वेन यो जातं संस्थानं राष्ट्रियं यदा।
तदा तु जायते हर्षो छात्राध्यापकयोः पुनः ।।20।।
नूतनानां समावेशादभिवृद्धिमयं गतः।
वसन्ते हि समायाते शोभते च वनं यथा ।।21।।
साहित्यञ्च यथा भाति तथैव सूचना नवाः।
कृपया रघुनाथस्य जातास्ततोऽपि नूतना इह ।।22।।
रघुनाथस्य वार्तेयं काशतां जनमानसे।
संस्कृतस्य प्रचारस्यादनया भारते पुनः।।23।।
परिसरस्य या शोभा, सैवेह राजते शुभा।
सुखिनो मानवाः सन्तु वर्तते नश्च कामना।।24।।
रघुनाथस्य नः कीर्ती राजते भुवने यथा।
तथैव लभतां नित्यं वर्तापि संस्कृते मुदा।।25।।





ग्लौरीमहोत्सवे परिसरीया: छात्रा:

## पुर्यां ग्लौरीमहोत्सवे छात्राणां सहभागिता

जनवरीमासस्य ५ दिनाङ्कात् ९ दिनाङ्कपर्यन्तम् ओडिशाराज्यस्य पुरीनगरे 'ग्लौरीफेस्टिवल' इति नाम्ना महोत्सव: समायोजित:। तत्र श्रीरघुनाथकीर्तिपरिसरस्य छात्रा: मोहितशर्म–शुभमभट्ट–साक्षीपालीवाल–वर्षानेगी–निकिताविष्ट–राजारामडंगवाल–आयुषउनियाल–दिगम्बररतूडी–गौरवडबरालाश्च भागग्रहणाय डॉ.अनिलकुमारस्य (साहित्य–विभागस्य प्राध्यापक:) मार्गदर्शने गतवन्त:। तत्र वादविवाद–सामूहिकविवादयो: मोहितशर्मा, सामूहिकनृत्ये दिगम्बररतूडी– शुभमभट्ट–साक्षीपालीवाल– वर्षानेगी–निकिताबिष्टादय:, एकलगाने राजारामडंगवाल:, वाद्ययन्त्रे आयुषउनियाल:, हास्याभिनये गौरवडबरालश्च स्वकौशलं प्रदर्शितवन्त:। ते च सर्वे परिसरस्य कीर्तिन्तत्र प्रसारितवन्तश्च ।



प्राचार्येण सह छात्रा:

## अगरतलायां संस्कृतशास्त्रस्पर्धासु परिसर–छात्राणं सहभागित्वम्




अगरतलायां परिसरीया: छात्रा:

केन्द्रीयसंस्कृतविश्वविद्यालय: अखिल–भारतीयशास्त्रीयस्पर्धामायोजितवान्। अस्मिन् वर्षेऽपि जनवरीमासस्य ०९.०१.२०२० दिनाङ्कात् १२.०१.२०२० दिनाङ्कपर्यन्तं केन्द्रीयविश्वविद्यालयेन स्व ५८ तमाया अखिल–भारतीयशास्त्रीयस्पर्धाया आयोजनम् अगरतलायां स्थिते एकलव्यपरिसरे विहितम्। तत्र डॉ.नितेशद्विवेदिना (व्याकरणप्राध्यापकेन) सह श्रीरघुनाथकीर्तिपरिसरस्य छात्रा: भागं गृहीतवन्त:। श्यामदेव: व्याकरणशलाकापरीक्षायाम्, पुनीतकुमार: व्याकरणभाषणे, सन्दीपकोठारी–शास्त्रीयस्फूर्ति स्पर्धायां सोत्साहं भागं गृहीत्वा परिसरस्य प्रतिष्ठां स्थापितवन्त:।

## एकादशअन्त:परिसरीययुवमहोत्सवे सङ्गणकस्पर्धायां लब्धं पदं श्रीरघुनाथकीर्तिपरिसरेण

शरीरमाद्यं खलु धर्मसाधनमिति धया किञ्च सर्वेषां छात्राणां शारीरिकविकासायापि केन्द्रीयसंस्कृतविश्वविद्यालयस्यान्त: परिसरीययुवमहोत्सव: प्रतिवर्षमायोज्यते। अस्मिन् वर्षेऽपि फरवरीमासस्य ०७ दिनाङ्कात् १० दिनाङ्कपर्यन्तं पुरीस्थे श्रीसदाशिवपरिसरे एकादश महोत्सवोऽयमायोजित:। तत्र विभिन्नासु स्पर्धासु श्रीरघुनाथ– कीर्तिपरिसरस्य ये छात्रा: गतवन्त:। तेषां नामानि निकिताबिष्ट–प्रतीक्षाध्यानी–साक्षीपालिवाल–मोहितशर्म–हीरासिंह–कल्पेश–विशेषबुटौला– दिम्बररतूडी–मनीषपन्त– अभिषेककुकरेती–अभिषेकसती–धनञ्जयदेवराडी–आकाशगैरौला–दुर्गेशप्रसाद–अवनीशकुमार–वेदप्रकाश–मुकुलपाण्डेय–आयुषउनियाल–अतुलध्यानी–हिमांशुपन्त–मनीषपन्त–ध्रुवजोशी–प्रियंकापञ्चभैया–धनेश कोटियाल–आदित्यडङ्गवाल–विपीनडबराल– प्रवीणचमौली –नितिकबडोलाश्चासन्। एते सर्वे छात्रा: डॉ.अरविन्दगौर–डॉ.सुरेशशर्म–डॉ.दिनेशचन्द्रपाण्डेयै: परिसरप्राध्यपकै: सह तत्र गत्वा विभिन्नासु प्रतियोगितासु स्वकलाकौशलं प्रदर्शितवन्त:। आकाशगैरौला इति नाम्ना छात्रेण तत्र सङ्गणकस्पर्धायां तृतीयं स्थानमपि लब्धम्।



पुरीपरिसरे अस्माकं छात्रा:




एकादश: अन्त: परिसरीयमहोत्सवस्य दृश्यम्



(मातुः सरस्वत्याः पूजनम्)

## पारिपालिता वसन्तपञ्चमी

प्रतिवर्षं श्रीरघुनाथकीर्तिपरिसरेण वसन्तपञ्चमीमहोत्सवस्यायोजनं क्रियते। अस्मिन् वर्षेऽपि जनवरीमासस्य २९ दिनाङ्के परिसरे अस्य कार्यक्रमस्यायोजनमभवत्। परिसरस्य प्राचार्येण प्रो.के.बी. सुब्बरायुडुमहोदयेनावसरेऽस्मिन् सरस्वत्याः पूजनं विधिविधानेन सर्वैः प्राध्यापकैस्सह कृतम्। वेदविभागाध्यक्षेण डॉ.शैलेन्द्रप्रसादउनियालमहोदयेन तद्विभागीयैः छात्रैश्च सर्वं पूजनकर्म शास्त्रोक्तविधिना मन्त्रोच्चारणपुरस्सरं सम्पादितम्, बहुभिश्छात्रैः सरस्वत्याः मङ्गलगीतान्यप्यवसरेऽस्मिन् प्रस्तुतानि।

## परिसरे गणतन्त्रदिवसस्यायोजनम्



(ध्वजोत्तलनं कुर्वन्तः प्राचार्याः)

अखिलभारते गणतन्त्रदिवसस्यायोजनं हर्षोल्लासेन क्रियते। श्रीरघुनाथकीर्तिपरिसरे ७१ तमो महोत्सवोऽयं महतोल्लासेन समायोजितः। प्रातः सार्धनववादने प्राचार्येण प्रो.के.बी.सुब्बारायुडुमहोदयेन सह सर्वे प्राध्यापकाः, कर्मचारिणः, छात्राश्च परिसरस्य प्राङ्गणे समुपस्थिताः सञ्जाताः। परिसरस्य प्राचार्येण ध्वजोत्तोलनं कृतम्। तदनन्तरं सर्वे मिलित्वा राष्ट्रगानमकुर्वन्। अवसरेऽस्मिन् परिसरस्य प्राचार्येण सर्वे इत्थं सम्बोधिता-देशस्य रक्षायै वयं सदा सज्जा भवामश्चेत्कदापि कुत्रापि किमपि काठिन्यं नैवागमिष्यतीति। अस्मिन्नवसरे प्राध्यापकैरपि स्व. विचाराः प्रकटिताः तथा बहुभिश्छात्रैरनेकानि गीतिकानि प्रस्तुतानि। अस्य कार्यक्रमस्य संयोजनं व्याकरणविभागस्य प्राध्यापकेन डॉ.श्रीओमशर्मणा विहितम्।

## सर्वदर्शनस्याखिलभारतीया सङ्गोष्ठी, विशिष्टव्याख्यानञ्च



(संङ्गोष्ठीं सम्बोधयन्तः प्रो.बनमालीबिश्वालाः, विराजमाना अतिथयश्च)

संस्कृतशास्त्रपरम्परायाः संरक्षाणाय प्राध्यापकानां ज्ञानाभिवृद्धये प्रतिवर्षं विश्वविद्यालयानुदानायोगनियमानुसारं सर्वेषु विषयेषु सङ्गोष्ठीनामायोजनं विश्वविद्यालयेषु महाविद्यालयेषु क्रियते। फरवरीमासस्य २४ दिनाङ्के श्रीरघुनाथकीर्तिपरिसरेण राष्ट्रियसंस्कृतसंस्थानद्वारा स्वीकृता सर्वदर्शनस्याखिलभारतीया सङ्गोष्ठी आयोजिता, यस्या विषयः 'अद्यतनसन्दर्भे दर्शनशास्त्राणां प्रासङ्गिकता' आसीत्। अस्याः समारम्भः वैदिकमङ्गलाचरणेन वेदविभागस्याध्यक्षेण कृतम्। अखिलभारतस्य प्रदेशेभ्यः सामागतैः विद्वद्भिरस्यां सङ्गोष्ठ्यां शोधपत्राणि पठितानि। कार्यक्रमस्य सञ्चालनं डॉ.अनिलकुमारेण साहित्यविभागस्य प्राध्यापकेन विहितम्, यत्र समेषां समागतानां स्वागतं प्रास्ताविकं भाषणमस्य कार्यक्रमस्य संयोजकेन व्याकरणविभागाध्यक्षेण प्रो.बनमालीबिश्वालमहोदयेन कृतम्, धन्यवादज्ञापनञ्च डॉ.आर.बालमुरुगनमहोदयेन कृतम्। अस्मिन् कार्यक्रमे विशिष्टव्याख्यानस्याप्यायोजनमासीत् यस्मिन् मीमांसाशास्त्रस्योपयोगितेत्यस्य विषयस्योपरि वाराणसीतः समागतानां प्रो.कमलाकान्तत्रिपाठिनामद्भुतं व्याख्यानमभूत्।

## संयोजकेन प्रो.बनमालीबिश्वालेन प्रस्तुतं प्रास्ताविकभाषणम्

संसारोऽयं दुःखमग्नः। अत्र न कोऽपि प्राणी वर्तते यः सर्वथा सर्वदा च सुखी सन्तुष्टश्च स्यात्। कश्चित् शारीरिकेण कष्टेन, कश्चित् मानसिकेन कष्टेन, कश्चित् सामाजिकेन च कष्टेन दुःखमनुभवति। एकतः कश्चिदत्र बुभुक्षापीडितः दुःखमनुभवति तथा पक्षान्तरे च कश्चिद्दिव्यानपि खाद्यपदार्थान् भुञ्जानः अजीर्णताविषदग्धो रात्रौ स्वपितुं न शक्नोति। अपरञ्च पारिवारिके जीवनेऽपि बहुविधाभिः समस्याभिरालिङ्गितो जनः सर्वदा कष्टमनुभवन् वर्तते। एवमेव संख्यातीतैर्दुःखैर्व्याप्ते निखिलेऽस्मिन् संसारे जनो येन केनापि दुःखेन प्रपीडितो भूत्वा तदपघातके हेतौ जिज्ञासते तथा तद्विनाशाय च यथासाध्यं प्रयतते। आध्यात्मिकाधिदैविकाधिभौतिकेभ्यस्त्रिविध-दुःखेभ्यस्तथा चान्येभ्यो प्रयतते। आध्यात्मिकाधिदैविकाधिभौतिकेभ्यस्त्रिविधदुःखेभ्यस्तथा चान्येभ्यो जागतिकप्रपञ्चेभ्यस्त्रस्तो जनस्ततो मुक्तिं कामयते। कदाचित् सांसारिक-बन्धनाज् जन्म-मरणचक्राच्च मुक्तिं कामयमानः सः तदर्थमुपायान् जिज्ञासते। वस्तुतः एतादृशीभिर्जिज्ञासाभिः दर्शनशास्त्राणामाधारशिला न्यस्ता वर्तते।

प्राचीन-कालादेव भारतभूमिः मौलिकविचाराणां चिन्तनानाञ्च प्रसङ्गे सर्वोत्कृष्टा तथोर्वरा च भूमिर्मन्यते। विभिन्नाभिर्दृष्टिभिर्विचारसरणिभिश्च विविधा दर्शनपद्धतयोऽत्र चास्तित्वे समायाताः। परिणामतः सांख्य-योग-न्याय-वैशेषिक-मीमांसा-वेदान्तादीनि आस्तिकदर्शनानि तथा चार्वाक-जैन-बौद्धादीनि नास्तिकदर्शनानि च भारतीय-परम्परायां प्रसिद्ध्यन्ति।

वस्तुतस्ततः पूर्वं वैदिक-कालादेव दर्शनविषयकं बहुविधं चिन्तनं सङ्केतरूपेण समारब्धम्। विश्वस्य प्राचीनतम-वाङ्मयस्य ऋग्वेदस्याविर्भावकालादेव विविध- दार्शनिकजिज्ञासानां निदर्शनमुपलभ्यते। तद् यथा नासदीयसूक्तस्य द्रष्टा ऋषिः कथयति को अद्धा वेद, क इह प्र वोचत्, कुत आयाता, कुत इयं विसृष्टिः इति।

एवमेव उपनिषत्सु अपि यम-नचिकेतोपाख्यानादिषु प्रभूततया दार्शनिक-चिन्तनानि प्रतिविम्बितानि सन्ति। यद्यपि वेद-ज्ञानमवबोद्धुं मुख्यतो द्विविधः एव प्रयासः समभवत् – दर्शनशास्त्राणि तथा ब्राह्मणोपनिषदादि-ग्रन्थाश्चेति तथापि यावान्दार्शनिक-विचाराणां प्रश्नः,न केवलं वेदोपनिषत्सु किन्तु पौराणिकसाहित्ये(विशिष्य भगवद्गीतादिषु), लौकिक-साहित्ये(विशिष्य काव्यशास्त्रादिषु), वेदाङ्गेषु (विशिष्य व्याकरणशास्त्रादिषु) तथा दर्शनान्तरशास्त्रेषु च दार्शनिक-चिन्तनानि द्रष्टुं शक्यन्ते। न केवलं भारते किन्तु पाश्चात्य-देशेष्वपि एतद्विषयकं चिन्तनं समारब्धम्। एवं लोके पाश्चात्यदर्शनस्यापि सूत्रपातमभवत्।

एतेषां दार्शनिकचिन्तनानामुपयोगिता यथा प्राचीनकाले आसीत् तथा वर्तमानकालेऽपि सर्वथा वरीवर्ति। यावन्मनुष्यः अविद्याशृङ्खलया बद्धस्तावदेव तस्य वैयक्तिकी सत्ता वर्तते। वैयक्तिक्यां सत्तायामेव सांसारिक-वस्तुभिः सम्बद्धं सुखदुःखजातं तं भृशं पीडयति। दर्शनोक्तदिशा साधनानुष्ठानैर्जायमानेन ज्ञानेनैव अविद्याबन्धनं विनश्यति तथा मनुष्यः नाहं शरीरम्, न चास्मीन्द्रियम्, नास्मि मनः, न च बुद्धिरित्यनुभवति। एतेनानुभवेन च त्रिविधदुःखानां विनाशः सम्भवति। एवमेव मनुष्यः मानसिकीं शान्तिमधिगन्तुं प्रभवति।

एतस्यामेव पृष्ठभूमौ भारतशासनस्य मानव-संसाधन-विकास-मन्त्रालयान्तर्गतेनराष्ट्रिय-संस्कृत-संस्थानाङ्गभूतेन देवप्रयागस्थ-श्रीरघुनाथकीर्ति-परिसरेण 24.02.2020 तः 25.02.2020 दिनाङ्कं यावदेका द्विदिवसीया अन्ताराष्ट्रिया संगोष्ठी समायोज्यते। अस्यां संगोष्ठ्याम् -अद्यतनसन्दर्भे उपर्युक्तानां दर्शनशास्त्राणां तथा दर्शनेतरशास्त्रोक्त-दार्शनिबिन्दूनाञ्च प्रासङ्गिकता-विषये अनुसन्धानात्मको विमर्शो विधास्यते। एतया सङ्गोष्ठ्या अवश्यमेव दर्शनशास्त्रीयानुसन्धानक्षेत्रेषु नूतनाः दिशः समुद्घाटिता भविष्यन्ति।

भवन्तः एतस्मिन् विषये विशेषज्ञाः सन्ति। अतः अस्याः सङ्गोष्ठ्याः कस्मिंश्चिदेकस्मिन् सत्रे चैतद्विषयकं किमपि विशिष्टं व्याख्यानं, किमपि विशिष्टं शोधपत्रं वा प्रस्तूय सङ्गोष्ठीमिमां सफलीकुर्वन्तु इति सप्रश्रयं सम्प्रार्थ्य हर्षमनुभवामः।




(प्राचार्येण सम्मानिता अतिथयः)



(अन्तर्जालीय उपवेशने)

## परिसरे समाचरितः मातृभाषादिवसः

अस्माकं देशे मातृभाषाया विशिष्टमेव महत्त्वं विद्यते, अवसरेऽस्मिन् सर्वासु संस्थासु मातृभाषाविषयकाः अनेकाः कार्यक्रमा आयोज्यन्ते। श्रीरघुनाथकीर्तिपरिसरेऽपि अवसरेऽस्मिन् 21.03.2020 दिनाङ्के अनेका भाषणप्रतियोगिताः, निबन्धलेखनप्रतियोगिताः, गायनप्रतियोगिताश्चाभवन्, यासु अनेकैः छात्रैः अनेकाभिश्च छात्राभिः भागग्रहणं कृतम्। प्राध्यापकैरपि स्वविचाराः अस्मिन् कार्यक्रमे प्रकटिताः। कार्यक्रमस्यास्य अध्यक्षेण परिसरप्राचार्येण छात्राः प्राध्यापकाश्चोद्बोधिताः। अस्य कार्यक्रमस्य सञ्चालनं डॉ.नवीनडॊबरियालमहोदयेन कृतम्।

## वेदान्तविभागस्य राष्ट्रियसम्मेलनम्, विशिष्टव्याख्यानञ्च



(सङ्गोष्ठायां विराजमाना अतिथयः)

फरवरीमासस्य २५ दिनाङ्के वेदान्तविभागेन राष्ट्रियसङ्गोष्ठी 'अद्वैतवेदान्ते दर्शनान्तराणां योगदानम् ' इति विषयमधिकृत्य समायोजिता। अस्याः सङ्गोष्ठ्याः सञ्चालनम् अस्य परिसरस्य शास्त्रीतृतीयवर्षस्य छात्रा साक्षीपालिवालः कृतवती। मङ्गलाचरणानन्तरं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठात् नवदेहलीतः समागतानामतिथीनां प्रो.के.अनन्तमहोदयानां व्याख्यानमभवत्, व्याख्यानस्य विषयः 'विशिष्टाद्वैतवेदान्तपरिचयः' आसीत्। तदनु प्रो.विष्णुपदमहापात्रस्य, प्रो.के.एस. सतीशस्य, प्रो.मारकण्डेयनाथतिवारिणश्च शोधपत्रमाध्यमेन स्वविषयसम्बद्धमतीवगम्भीरचिन्तनमभूत्। शोधच्छात्रैः परिसरीयप्राध्यापकैः डॉ.अनिलकुमार–डॉ. शैलेन्द्रप्रसादउनियाल–डॉ.दिनेशचन्द्रपाण्डेय–डॉ.सच्चिदानन्दस्नेहीमहोदयैश्चापि शोध पत्राणि प्रस्तुतानि। सङ्गोष्ठी संयोजकेन व्याकरणविभागाध्यक्षेण प्रो.बनमालीबिश्वालेन प्रास्ताविकं भाषणं प्रदत्तम् डॉ. आर. बालमुरुगनमहोदयेनापि स्वविशिष्टं वक्तव्यमवसरेऽस्मिन् प्रस्तुतम्। अन्ते च परिसरस्य प्राचार्येणाद्वैतवेदान्तविभागाध्यक्षेणाध्यक्षपदमलङ्कृतेन प्रो.के.बी.सुब्बरायुडुमहोदयेन सर्वे समुद्बोधिताः, अन्ते च शास्त्रीतृतीयवर्षस्य छात्रेण सर्वेभ्यो धन्यवादाः प्रदत्ताः।

## व्याकरणविभागास्यान्ताराष्ट्रियसङ्गोष्ठी, विशिष्टव्याख्यानञ्च



(अभिभाषमाणाः मुख्यवक्तारः प्रो. अशोकचन्द्रगौडमहोदयाः)

व्याकरणविभागस्यान्ताराष्ट्रिया सङ्गोष्ठी फरवरीमासस्य २६ दिनाङ्के प्रो. बनमालीबिश्वालमहोदयानां संयोजकत्वे प्रो.के.बी.सुब्बरायुडुमहोदयानामाध्यक्ष्ये च ''संस्कृतव्याकरणपरम्परायामाधुनिकविदुषां योगदानम्' इत्यस्मिन् विषये समायोजिता। सर्वादौ वैदिकमङ्गलाचरणं वेदविभागाध्यक्षेण डॉ. शैलेन्द्रप्रसादउनियालमहोदयेन वैदिकछात्रैश्च कृतम्, तत्र समेषां समागतानामातिथीनां स्वागतं विषयप्रवर्तनं च कार्यक्रमसंयोजकेन व्याकरणविभागाध्यक्षेण प्रो.बनमालीबिश्वालमहोदयेन कृतम्। अवसरेऽस्मिन् मुख्यवक्तृरूपेण प्रो.अशोकचन्द्रगौडमहोदयाः समुपस्थिता आसन् येषां विशिष्टव्याख्यानम्–'व्याकरणपरम्परायामाधुनिकवैयाकरणानां योगदानमिति विषयमाधारीकृत्याभूत्। व्याख्यानात् परं विविधेभ्यः प्रान्तेभ्यः समागतैः आचार्यैः शोधच्छात्रैश्च स्वविशिष्टचिन्तनं शोधपत्रमाध्यमेन प्रस्तुतम्। अस्यां सङ्गोष्ठ्यां परिसरस्य सर्वे प्राध्यापकाः प्रो.विजयपालशास्त्रि–डॉ.सच्चिदानन्दस्नेही–डॉ.आर.बालमुरुगन–डॉ. कृपाशङ्करशर्म–डॉ.अनिलकुमार–डॉ.शैलेन्द्रप्रसादउनियाल–डॉ.वीरेन्द्रसिंहबर्त्वाल–डॉ.अरविन्दगौड–डॉ.दिनेशचन्द्रपाण्डेय–डॉ.अवधेशबिजल्वाणा अपि उपस्थिता आसन्। अस्याः सङ्गोष्ठ्याः सञ्चालनं व्याकरणविभागस्य प्राध्यापकेन डॉ.श्रीओमशर्मणा विहितम्।

## संयोजकेन प्रो.बनमालीबिश्वालेन प्रस्तुतं प्रास्ताविकभाषणम्

अस्ति संस्कृत-व्याकरण-शास्त्रस्य सुमहती परम्परा। सा च परम्परा न केवलं प्राचीना किन्तु वैज्ञानिकी अपि वर्तते। अस्यां परम्परायाम् पाणिनीयतन्त्रस्य महत्त्वं सर्वातिशायि। पाणिनि-कात्यायन-पतञ्जलि-सदृशानां साक्षान्मुनिस्वरूपाणां त्रयाणामाचार्याणां त्रिमुनीति संज्ञा विश्वप्रसिद्धा। एतेषामाचार्याणां सूत्र-वार्तिक-भाष्याणि उत्तरोत्तरं प्रामाणिकानीति तथ्यं यथोत्तरं मुनीनां प्रामाण्यमित्यादिवचनैः प्रमाणितं भवति। इयं च संस्कृत-व्याकरणशास्त्र-परम्परा स्थूलरूपेण त्रिधा विभज्यते -- 1. पाणिनिपूर्व-व्याकरण-परम्परा, 2. पाणिनीय-व्याकरण-परम्परा तथा 3. पाणिन्युत्तर-व्याकरण-परम्परा चेति। युधिष्ठिरमीमांसकेन पाणिनिपूर्व-व्याकरण-परम्परायां प्रातिशाख्यादिग्रन्थेषु स्मृतानाम् एकोनषष्टि-सङ्ख्याकानाम् आचार्याणां सप्रमाणा सूची प्रदत्ताऽस्ति येषु आपिशलि-काश्यप-गार्ग्य-गालव-चाक्रवर्मण-भारद्वाज-शाकटायन-शाकल्य-सेनक-स्फोटायनाश्चेत्यादयः दश आचार्याः पाणिनिना स्मृताः सन्ति तथा अन्ये च सर्वथा विस्मृताः उपेक्षिताश्च वर्तन्ते। किन्तु पाणिनिना अनुल्लिखिताः अपि तत्पूर्ववर्तिनः आचार्याः महेश्वर-बृहस्पति- इन्द्र-वायु- भरद्वाज-भागुरि- पौष्करसादि- चारायण- काशकृत्स्न- वैयाघ्रपाद्य- माध्यन्दिनि- रौढि- शौनकि- गौतम- व्याडिप्रभृतयः प्रसिद्ध्यन्ति। एवमेव पाणिन्युत्तरवर्तिषु आचार्येषु कातन्त्रव्याकरणकारः शर्ववर्मा, चान्द्रव्याकरणकारः चन्द्रगोमी, क्षपणकः, जैनेन्द्रव्याकरणकारः देवनन्दी, वामनः, पाल्यकीर्तिः, भोजदेवः, शिवस्वामी, बुद्धिसागरः, भद्रेश्वरसूरिः, वर्धमानः, महेन्द्रः, मलयगिरिः, क्रमदीश्वरः अनुभूतिस्वरूपाचार्यः, बोपदेवः तथा पद्मनाभश्चेत्यादीनाम् आचार्याणां नामानि सुप्रसिद्धानि। पाणिनीय-व्याकरण-परम्परायामपि सन्त्यनेके मूलग्रन्थाः व्याख्याग्रन्थाश्च। पाणिनीयव्याकरणमाश्रित्य प्रवर्तितायां व्याख्यापरम्परायामपि द्विविधा व्याख्यापरम्परा दृश्यते - सूत्रानुसारिणी व्याख्यापरम्परा तथा प्रक्रियानुसारिणी च व्याख्यापरम्परा। सूत्रानुसारिण्यां व्याख्या-परम्परायां काशिकादयः तथा प्रक्रियानुसारिण्यां व्याख्या-परम्परायां प्रक्रियाकौमुदी- वैयाकरणसिद्धान्तकौमुद्यादयः प्रसिद्ध्यन्ति। प्रक्रियाग्रन्थेष्वपि भट्टोजिदीक्षितस्य वैयाकरणसिद्धान्तकौमुदी मूर्धन्यभूता वर्तते। अत एवोच्यते –कौमुदी यदि नायाति वृथा भाष्ये परिश्रमः। कौमुदी यदि चायाति वृथा भाष्ये परिश्रमः। सिद्धान्तकौमुद्याः अपि पञ्चविंशत्यधिकाः टीकाः उपलभ्यन्ते। इयमपि संस्कृतव्याकरण-परम्परा प्राचीन-नव्य-भेदेन द्विधा विभक्ताऽस्ति। परन्तु प्राचीन-व्याकरणं भवतु नव्य-व्याकरणं वा भवतु, व्याकरणशास्त्रेतिहासो वा भवतु, व्याकरण-कोशो वा भवतु,एकञ्च तथ्यमत्र सर्वथा स्मरणीयमस्ति यद् आधुनिकविदुषां योगदानं विना संस्कृतव्याकरण-परम्परा अपूर्णा एव तिष्ठति। एतेषामाधुनिकविदुषां द्विधा विभागः कल्पयितुं शक्यते – प्राच्यविद्वांसः (भारतीया विद्वांसः) पाश्चात्यविद्वांसः (वैदेशिका विद्वांसः) चेति। एकतो यत्र प्राच्यविद्वत्सु रामकृष्णगोपालभण्डारकर-युधिष्ठिरमीमांसक-के.वी. अभ्यङ्कर-शिवरमदत्तात्रेयजोशी-बी.पी.लिमाये-गजाननबालकृष्णपलसुले- वासुदेवशरणअग्रवाल- के.ए.एस.अय्यर-श्रीपदकृष्ण बेल्वाल्कर- क्षितीशचन्द्रचटर्जी -गौरीनाथशास्त्री- सरोजा बी. भाटे- जानकीप्रसाद द्विवेदी- कपिलदेव शास्त्री- एस्. एम्. कत्रे-एस.डी.लड्डू-माधवकृष्णशर्मा-विमलकृष्णमतिलाल-रामाज्ञापाण्डेय- एम्.डी.पण्डित-एम्.डी.बालसुब्रमह्मण्यम्- भागीरथप्रसादत्रिपाठी- विष्णुपादभट्टाचार्य- प्रभातचन्द्रचक्रवर्ती-टीकारामपन्थी –वासुदेवगोपाल परांजपे –देवप्रकाश शास्त्रीपातञ्जल –श्रीधरशास्त्रीपाठक –सिद्धेश्वरशास्त्री- मधुकरपाठक –प्रभुदयाल अग्निहोत्री –प्रज्ञा देवी –राधेश्याममिश्र- रमाकान्तमिश्र –रामनाथशर्मा –रामप्रसाद त्रिपाठी –रामशरणदासवैष्णव –राम सुरेश त्रिपाठी – सतीप्रसादमिश्र –सत्यव्रतशास्त्री-जयदेव मोहनलालशुक्ल–बलदेव सिंह – श्रीकृष्ण शर्मा –वेलूरी सुब्बा राव– पी.एस् सुब्रह्मण्यम् शास्त्री–सीताराम शुक्ल – सुशीलचन्द्रमिश्र –उदयनारायणतिवारी –कपिलमुनितिवारी –वामदेवमिश्र– सत्यकामवर्मा -वेदपतिमिश्र–विद्यानिवासमिश्र–भीमसिंह वेदालङ्कार - विशनलालगौड –अशोक अक्लुज्कर-सदृशानां नामानि उल्लेख्यानि सन्ति।

तत्रैवापरतःपाश्चात्यविद्वत्सु जर्जकार्डोना-पलकिपार्स्कि-जे.एफ-स्टाल- ए.सी.बर्नल, – बरो थाँमस् – नित्ती डाँलची - टी.एस्. पैक - लाँरेन्ज कीलहार्न–कार्ल एच् पाँटर –ह्विट्ने विलियमड् वाईट – स्टाल जोहान फ्रैड्रिक – रेनु लुई –रौशर रोजैन – राँजर डेविड एलिस-सैल्यू पीटर –शैफ्ड् बैटी – स्पेजर, जे.एस्. –एलिन, विलियम सिडनी –गोल्डस्टकर– इन्स्लरस्टानले - ओफ्रेक्ट थिओडोर -सदृशानां नामानि उल्लेखमर्हन्ति। संस्कृतव्याकरण-परम्परायाम् एतेषां प्राच्यानां पाश्चात्यानाञ्च आधुनिकविदुषां महद् योगदानं वर्तते। प्राचीन-व्याकरण-नव्यव्याकरणयोस्तेषाञ्च योगदानं मौलिकग्रन्थ-विविधभाषीयव्याख्याग्रन्थ-समीक्षाग्रन्थ-इतिहास-कोशादिक्षेत्रेषु विभक्तुं शक्यते येषां विवरणमन्ते संलग्नमस्ति। न केवलमुपर्युक्तानामपितु अन्येषामपि सम्बद्धानां विदुषां कार्यजातं रेखाङ्कयितुं तन्महत्त्वं च पुरस्कर्तुं भारतशासनस्य मानव-संसाधन-विकासमन्त्रालयान्तर्गतस्य राष्ट्रिय-संस्कृत-संस्थानाङ्गभूततस्य देवप्रयागस्थ-श्रीरघुनाथकीर्ति-परिसरस्य व्याकरण-विभागेन 24.02.2020 तः 25.02.2020 दिनाङ्कं यावदेका द्विदिवसीया अन्ताराष्ट्रिया सङ्गोष्ठी आयोज्यते। अस्यां संगोष्ठ्यां व्याकरण-परम्परायामाधुनिकविदुषां योगदानविषये अनुसन्धानात्मको विमर्शो भविष्यति। एतेन विमर्शेन अवश्यमेव संस्कृतव्याकरण-सम्बद्धा नूतनाः दिशः समुद्घाटिता भविष्यन्ति।

एतस्यां सङ्गोष्ठ्यां प्राच्य-पाश्चात्याधुनिक-विदुषां योगदानम् अथवा एतत्सम्बद्धानामन्येषामपि योगदानमाधृत्यविचाराः प्रवर्तिष्यन्ते। भवन्तः एतस्मिन् विषये विशेषज्ञाः सन्ति। अतः अस्यां सङ्गोष्ठ्यां स्वस्वविचारान् प्रस्तूय सङ्गोष्ठीमिमां सफलीकुर्वन्तु इति सप्रश्रयं सम्प्रार्थ्य अन्ते च पद्यमयीं प्रस्तावनां प्रस्तूय विरमामि विस्तरात् ।

# पद्यमयी प्रस्तावना



(भाषमाणाः व्याकरणविभागाध्यक्षाः)

श्रीरघुनाथकीर्त्याख्ये चास्मिन् परिसरे नवे।
व्याकरणविभागीया सङ्गोष्ठी द्विदिनात्मिका ।1।
सा चान्ताराष्ट्रिया गोष्ठी विचारान् विदुषां नवान्।
ख्यापयिष्यति लोकेऽस्मिन्नाधुनिकाश्रितान् पुनः ।2।
पक्षविपक्षसम्मिश्रान् निर्मथ्य युक्तिसङ्गतान्।
स्थापयिष्यति सिद्धान्तान् नवनीतसमांश्च कान् ।3।
सन्ति व्याकरणे शास्त्रे सुमहत्यः परम्पराः।
तास्वाधुनिक-सन्दर्भे सङ्गोष्ठीयं विशिष्यते ।4।



(समुपस्थिताः विद्वांसः छात्राश्च)

प्राचीनं वा भवेदत्र नव्य-व्याकरणं पुनः।
मूलग्रन्थोऽस्तु टीका वा चोपटीका भवेत् क्वचित् ।5।
इतिहासो भवेदत्र कोशो वा भवतु पुनः।
सर्वत्राधुनिकानाञ्च दृश्यते विदुषां श्रमः ।6।
तद्योगदानमत्रैव द्विधा विभज्यते क्वचित्।
केचित्प्राच्याश्च विद्वांसः पाश्चात्याश्चापरे पुनः ।7।
योगदानं विना तेषामपूर्णेयं परम्परा।
नवमध्ययनं तेषामन्वेष्टव्यं गवेषकैः ।8।
महज् ज्ञानं प्रदत्तं यत् प्राच्य-पाश्चात्यकैः समैः।
सप्रमाणं तदेवात्र चोद्घाटितं भविष्यति ।9।
विदुषां समधीतीनां नवशोधैकचक्षुषाम्।
सङ्गोष्ठी चाद्वितीयेयं सिद्ध्यतां मार्गदर्शिका ।10।

(संयोजकः- प्रो. बनमाली विश्वालः)



देवप्रयागे रघुनाथकीर्तिर्भाति प्रभाते सुमनोहरा या।
गङ्गातटे पावनमन्दिरे सा मे मानसे भातु विभावपूर्णा।। (अनिलः)

# वेदविभागस्य राष्ट्रियसम्मेलनम्, विशिष्टव्याख्यानञ्च

०१.०३.२०२० दिनाङ्के वेदविभागीया राष्ट्रिया सङ्गोष्ठी समायोजिता, यस्याः विषयः आसीत्- वैदिकवाङ्मये विष्णुतत्त्वम्। सङ्गोष्ठ्याः उद्घाटनकार्यक्रमे मुख्यातिथित्वेनोपस्थिता आसन् प्रो.वेदप्रकाशउपाध्यायाः ये चण्डीगढतः समागताः, मुख्यवक्तृरूपेण प्रो.मनोजकुमारमिश्रमहोदयाः ये जम्मूपरिसरे वेदविभागाध्यक्षाः सन्ति। अस्य कार्यक्रमस्य संयोजकेन वेदविभागाध्यक्षेण डॉ शैलेन्द्रप्रसादउनियालेन समेषामुपस्थितानां स्वागतं विहितं विषयोपस्थापनञ्च कृतम्। उद्घाटनसत्रात्परं मुख्यवक्तृरूपेण समुपस्थितानां प्रो.मनोजमिश्रमहोदयानां व्याख्यानम्-'वेदाध्ययनदृशा प्रातिशाख्यानां महत्त्वम्' इति विषयमाधारीकृत्य सञ्जातम्। तदनन्तरं विविधेभ्यः प्रान्तेभ्यः समागतैः प्राध्यापकैः शोधच्छात्रैश्च शोधपत्रवाचनं कृतम्।

## संयोजकेन डॉ.शैलेन्द्रप्रसादउनियाल प्रस्तुतं प्रास्ताविकम्

अयि शारदाचरणाम्बुजसमुपासकाः शिष्यशासकाः विदन्त्येव भवन्तोभवन्तः यद्वेदा अस्माकं भारतीयानां परमप्रमाणभूताः ज्ञानशेवधित्वेन राराजन्ते। "वैदिकवाङ्मये विष्णुतत्त्वम्" इति विषयमधिकृत्य वेदविभागेन राष्ट्रिया-सङ्गोष्ठी समायोज्यते। अस्यां विद्वत्सङ्गोष्ठ्यां विविधविचारचातुर्यविनिर्जितसकलवादिवृन्दोपरिविराजमानैः भासमानैः विद्वद्भिः स्वीयशोधपत्रवाचनपुरस्सरं श्रीसुदर्शनक्षेत्रे भगवतः बद्रीनाथस्य तथा च श्री नृसिंहाचले तस्य नरायाणस्य स्वरूपं लक्षणं तथा च तस्य प्राप्तेरुपायाः व्याख्यास्यन्ते, येन मानवानां पुरुषार्थः सेत्स्यति। अस्यामेव सङ्गोष्ठ्यां "वेदाध्ययनदृशा प्रातिशाख्यानां महत्त्वम्"। इत्यस्मिन्विषये विशिष्टव्याख्यायनं प्रो. मनोजकुमारमिश्रवर्यैः व्याख्यास्यते तथा च मुख्यातिथित्वेन राष्ट्रपतिपुरस्कृतवेदविद्वद्भिः प्रो. वेदप्रकाश उपाध्यायमहोदयैः कार्यक्रमस्य समुद्घाटनं करिष्यते तत्र भवतां गरिममयी समुपस्थितिः सम्प्रार्थ्यते।

वैदिके वाङ्मये विष्णुतत्त्वं भृशम्,
शोभते शङ्करश्चात्र नो संशयः।
विष्णुतत्त्वं कथं शङ्करो जायते,
ध्यायते वैदिकैर्लौकिकैश्चापि सः॥1॥

अद्य निर्णीयते क्षीयते संशयः,
शोधकैर्ज्ञानिभिः शोधलेखैः स्वयम्।
तस्य चाप्तेरुपायास्तु शास्त्रेषु ये,
वर्णिताश्चानुभूता हि वक्ष्यन्ति ते॥2॥

स्वागतञ्चैव तेषां जनानां सदा,
सर्वदा ज्ञानगोष्ठ्यां मनो रम्यते।
श्रूयतां विष्णुतत्त्वं मतौ धार्यताम्,
जीवने लक्ष्यसिद्धिः शुभा प्राप्यताम्॥3॥

विष्णुना व्याप्तमेतच्च लोकत्रयं
येन चाप्येत सर्वेश्वरश्चाव्ययः।
यस्य विज्ञानतो ज्ञायते विश्वकम्,
केन चेतेम तं चिन्तयामो वयम्॥4॥

**उपविषयाः-**

1. गणेशस्य स्वरूपवैशिष्ट्यम्।
2. श्रौतयागानां महत्त्वम्।
3. षोडशसंस्काराणां पर्यालोचनम्।
4. वर्णाश्रमव्यवस्थायाः महत्त्वम्।
5. भारतीय-संस्कृतिः।
6. आधुनिककाले वेदानामुपयोगिता।
7. स्मार्त्तयागानां वैशिष्ट्यम्।
8. वेदभाष्याणां पर्यालोचनम्।
9. गृह्यसूत्राणां महत्त्वम्।
10. ब्राह्मणग्रन्थानां समीक्षणम्।
11. पुराणेतिहाससाहित्यन्यायदर्शनशास्त्रेषु विष्णोः स्वरूपम्।







(सङ्गोष्ठ्याः कानिचन दृश्याणि)

## साहित्यविभागस्य राष्ट्रियसङ्गोष्ठी, विशिष्टव्याख्यानञ्च



(सङ्गोष्ठ्याम् अतिथयः)

श्रीरघुनाथकीर्तिपरिसरस्य साहित्यविभागेन फरवरीमासस्य २८ दिनाङ्के स्वविभागीया राष्ट्रिया सङ्गोष्ठी समायोजिता। अस्याः सङ्गोष्ठ्याः केन्द्रीयविषयः 'आधुनिकसंस्कृतसाहित्ये नूतनप्रवृत्तयः' इति आसीत्। सङ्गोष्ठ्याः संयोजकाः प्रो.विजयपालशास्त्रिणः, अध्यक्षाः परिसरस्य प्राचार्याः प्रो.के.बी.सुब्बरायुडुमहोदयाश्चासन्। अस्यां मुख्यातिथित्वेन डॉ. निरञ्जनमिश्रः भगवान्दाससंस्कृतमहाविद्यालयात् हरिद्वारात् समागतः, विशिष्टातिथित्वेन च प्रो.भागीरथिनन्दः श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविश्वविद्यालयात् नवदेहलीतः समुपस्थितावास्ताम्। अस्यां सङ्गोष्ठ्यां वैदिकमङ्गलाचरणेन सह अतिथिभिः दीपप्रज्वालनं डॉ. शैलेन्द्रप्रसादउनियाल महोदयेन कारितम्, लौकिकमङ्गलाचरणं शास्त्रीप्रथमवर्षस्य छात्रेण धनञ्जयदेवराडिना कृतम्। समागतानां स्वागतं यत्र प्रो. विजयपालशास्त्रिणा, विषयोपस्थापनञ्च डॉ. अनिलकुमारेण विहिते। मृख्यातिथिरूपेण डॉ.निरञ्जनमिश्रेण आधुनिकसंस्कृतसाहित्ये नूतनप्रवृतीनां विषये एका विस्तृता परम्परा प्रस्तुता यया च चिन्तनस्य नूतनमार्गः समेषां दृष्ट्यां समागतः। ततः परं विशिष्टव्याख्यानं प्रो.भागीरथिनन्दमहोदयानाम् 'अभिज्ञानशाकुन्तलनाटकस्य काव्यशास्त्रीयपक्षः' इत्यस्मिन् विषये सञ्जातम्। यत्र कालिदासग्रथितनाटके कथं काव्यशास्त्रीयतत्त्वानां समावेशो विद्यते कथं च व्यंग्यत्वेन कविना नाटकीयपात्राणां समावेशो विहितः इति सर्वं तैः प्रस्तुतम्। अनन्तरं शोधपत्रवाचनसत्रस्यारम्भोऽभवत्, यत्र डॉ. आशुतोषगुप्त-डॉ. कञ्चनतिवारि-डॉ.धर्मेन्द्रकुमारसिंहदेव-डॉ.अजीतपंवार-डॉ.संजीवभट्ट-डॉ.कृपाशङ्करशर्म-डॉ.दिनेशचन्द्रपाण्डेय-नीराकुमारी-सत्यापाण्डेय-विजयशङ्करसिंह-देवस्मित दे-सूर्यप्रकाशपाण्डेय- इत्यादिभिः शोधपत्रवाचनं कृतम्। समापनावसरे प्रो. वेदप्रकाश. उपाध्यायमहोदयानाम् अभिभाषणम् अभवत्। अध्यक्षाणामुद्बोधनानन्तरं शान्तिपाठेन कार्यक्रमः समाप्तिं गतः। डॉ.अनिलकुमारेण प्रस्तुतं प्रास्ताविकम्- काव्ये नाट्ये तथा शास्त्रे यथाऽऽभान्ति प्रवृत्तयः।

अधुना विदुषां या वै तासां स्यादिह चिन्तनम्।।

संस्कृतसाहित्ये प्राचीनकालादेव विविधाः काव्यप्रवृत्तयो दृश्यन्ते परश्चाधुना आभान्ति ततोऽप्यधिका यथा पद्यकाव्यविधायां महाकाव्य-लघुकाव्य-मुक्तक-गीतिका-गलज्जलिका-रागकाव्य-समस्यापूर्तिकाव्य-दूतकाव्य -सङ्गीत-सङ्गीतिका-स्तोत्रकाव्य-लहरीकाव्य-विनोदकाव्य-एकबिम्बात्मककाव्य-लघुबिम्बकाव्य-लोकगीत-प्रतीककाव्य -गीतिकाव्य-विलापकाव्य-प्रगतिशीलकाव्य-(प्रणय-दलित-यात्रावृत्त-वैदेशिकवृत्त-विमानकाव्य-आत्मकथा -जीवनचरितानि ) -लिपिकाव्य-नाट्य-प्रगीतकाव्य-पत्रकाव्य-लघुवर्णकाव्य-हास्यव्यंग्यकाव्य-अन्योक्तिकाव्य -नूतनच्छन्दोविधान-वैदेशिकच्छन्दोविधान (हाइकू, सानेट, तान्का, सीजो)-नवगीतकाव्य -शास्त्रकाव्य-बौद्धसाहित्यमिश्रितसंस्कृत-उत्तराधुनिक- प्राचीरकाव्यानि। तत्र च यथा प्रगतिशीलकाव्येषु गोविन्दचन्द्रपाण्डेयस्य भागीरथी, प्रमोदकुमारनायकस्य काव्यसंग्रहगर्तः, यात्रावर्णनेषु महामहोपाध्यायगणपतिशास्त्रिणः सेतुयात्रावर्णनम्, गोपबन्धुमिश्रस्य सैनापञ्चकम्,आत्मकथापरककाव्येषु तपोवनस्वामिनस्तपोवनचरितम्, जीवनचरितेषु शिवकुमारमिश्रस्य यतीन्द्रदेशिकचरितम्, विमानकाव्येषु राधावल्लभत्रिपाठिनो भूलोकवर्णनम्, अभिराजराजेन्द्रमिश्रस्य विमानयात्राशतकम्, लिपिकाव्येषु हर्षदेवमाधवस्य निष्क्रान्ताः सर्वे, हास्यव्यंग्यकाव्येषु प्रशस्यमित्रस्य कोमलकण्टकावली, अन्योक्तिकाव्येषु प्रमोदचन्द्रमिश्रस्य अन्योक्तिपञ्चाशिका, समस्यापूर्तिकाव्येषु हर्षदेवमाधावस्य तान्काकाव्यम्, हरेकृष्णमेहरस्य सीजोकाव्यम्, श्रीभट्टाचार्यस्य सानेटकाव्यम्, गजलविधायां जगन्नाथपाठक-जानकीवल्लभादीनां च ग्रन्थाः सन्ति। एकविम्बात्मककाव्येषु बनमालिनो बिश्वालस्य प्रियतमः वेलेंटाइन्डे सन्देशः,नवगीतकाव्येषु रामनाथपाठक-मायाप्रसादत्रिपाठि-प्रभातशास्त्रिणां काव्यानि विद्यन्ते। बौद्धसाहित्यमिश्रितसंस्कृतसाहित्ये शान्तिभिक्षुशास्त्रिणो बौद्धविजयकाव्यम्, उत्तराधुनिककाव्येषु रमाकान्तशुक्लस्य रौति ते भारतम् एवं पद्यकाव्यपरम्परायां विभिन्ना ग्रन्था रचिताः।


(भाषमाणाः प्रो. भागीरथिनन्दमहोदयाः)

गद्यकाव्यविधायामप्येवमेव कथा-कथानिका-दीर्घकथा-लघुकथा-टुपकथा-दैनन्दिनीकथा-पत्रकथा-चित्रकथा-रेखाचित्रकथा-स्पशकथा-त्रासत्कथा-कथान्तरकथा-आख्यायिका-निबन्ध-कथोपन्यास-संस्मरण-आत्मकथा-जीवनचरित-यात्रावृत्तान्त-हास्यव्यंग्य-ललितकथाः सुशोभन्ते आधुनिकविद्वत्सदसि। तत्र कथासु क्षमारावपण्डितस्य कथापञ्चकम्, कलानाथशास्त्रिणः कथानकवल्ली, लघुकथासु केशवदेवस्य कथाकौतुकम्, बनमालीबिश्वालस्य नीरस्वन-बुभुक्षा जीजिविषादयः, टुपकथासु सम्भाषणसंदेशस्य विशेषाङ्काकः, दैनन्दिनीकथासु हर्षदेवमाधवस्य मूको रामगिरिर्भूत्वा, पत्रकथासु अप्पाशास्त्रिराशिवाडेकरस्य काव्यानि, रेखाचित्रकथासु कलानाथशास्त्रिणः कथाद्वयं रत्नाकरस्य १-२ अङ्कयोः, स्पशकथासु नारायणदाशस्य हत्याकारीकः, त्रासत्कथासु नारायणदाशस्यैव त्रासत्कथासंग्रहः, ललितकथानिबन्धेषु हृषीकेशभट्टाचार्यस्य प्राप्तपञ्चमः, हास्यव्यंग्यकथासु सम्पदानन्दमिश्रस्य हास्यमञ्जरी, ललितकथासु बनमालीबिश्वालस्य रूपवद्भार्यः, संस्मरणकथासु बनमालीबिश्वालस्यैव स्वप्ने दृष्टोऽच्युतः, जीवनवृत्तकाव्येषु श्रीशैलताताचार्यस्य श्रीदीक्षितचरितम्, यात्रावृत्तेषु गोपबन्धुमिश्रस्य पुरस्तात् प्यारिसश्चेति काव्यानि दृश्यन्ते। बालसाहित्ये मन्त्र-श्लोक-चाटुकाव्य-प्रहेलिका प्रश्नोत्तर-समस्यापूर्ति-शिशुगीत-बालपद्य-शयनगीतिकाव्यानि सामाजिकाननुरञ्जयन्ति यथा गौरीकुमारब्रह्मणो भारतसंहतिः, सुकान्तसेनापतेः सुकान्तकथाविंशतिः, दीनबन्धुभञ्जस्य सुभाषितपुष्पकमित्यादीनि मनोहराणि। नाट्यसाहित्ये लघुनाटकम्, नभोनाटकम्, विथी, नृत्यनाटकम्, प्रतीकनाटकम्, प्रकीर्णनाटकम्, प्रहसनञ्च। यथा हास्यविधायां वी. राघवनस्य विमुक्तिः, नृत्यनाटकेषु वनमालाभवालकरस्य रामवनगमनम्, प्रतीकात्मकनाटकेषु हर्षदेवमाधवस्य परीक्षा तथा कल्पवृक्षः, प्रकीर्णरूपकेषु यतीन्द्रविमलस्य महिमामयभारतश्चेतानि सहृदयहृदयमाह्लादयन्ति नितराम्। अनूदितसाहित्येऽपि आधुनिककाव्यविरचनपटूनां प्रवृत्तिर्विस्तृता तथैव सञ्जातेति मे मतिर्यथा भागीरथिनन्दस्य याज्ञसेनी, हरेकृष्णमेहरस्य तपस्विनी, बनमालीबिश्वालस्य पत्रालयश्चानूदितकाव्यानि। मननजल धेरन्तरुदरे काव्यशास्त्रनिमग्नानां नवनवोन्मेषशालिनी प्रतिभा क्षणे क्षणे नवतामुपैत्येव, चमत्कारसिद्धान्ते स्यादुत सौन्दर्यसिद्धान्ते, अलङ्कारकाव्यजीवने अलम्भावस्तु पूर्णतायां वा सर्वत्र साहित्यशास्त्रमर्मज्ञाः कृतभूरिपरिश्रमाः संदृश्यन्ते। यद्यपि सर्वाणि काव्यशास्त्रीयतत्त्वानि पूर्वमेवालोचितानि, न तेभ्यो भिन्नं किमपि प्रतिभाति तथापि नूतनदृष्ट्या विचारस्तु दृश्यत एव यथा राधावल्लभस्य अभिनवकाव्यालङ्कारः, रेवाप्रसादद्विवेदिनः काव्यालङ्कारकारिका, अभिराजराजेन्द्रमिश्रस्य अभिराजयशोभूषणम्, रामप्रतापवेदालंकारस्य चमत्कारविचारचर्चा, हर्षदेवमाधवस्य वागीश्वरीकण्ठसूत्रं बनमालीबिश्वालस्य काव्यतत्त्वसमन्वितिश्चाधुनिककाव्यशास्त्रीयग्रन्थाः। एवम् आधुनिकसाहित्ये या अपि काव्यकथानाटककाव्यशास्त्रादीनां नूतनप्रवृत्तयो दृश्यन्ते तासां सर्वासां विषये महनीयं चिन्तनं समेषां काव्यशास्त्रविनोदज्ञानां समक्षमुपस्थापनायेयमायोज्यमाना वर्तते साहित्यिकी सङ्गोष्ठी।

अस्यां सङ्गोष्ठ्यां चिन्तनीया विषयाः अधोलिखिताः भवन्ति -

१. पद्यसाहित्ये नूतनप्रवृत्तयः, २. गद्यसाहित्ये नूतनप्रवृत्तयः, ३. नाट्यसाहित्ये नूतनप्रवृत्तयः
४. बालसाहित्ये नूतनप्रवृत्तयः ५. अनूदितसाहित्ये नूतनप्रवृत्तयः ६. काव्यशास्त्रे नूतनप्रवृत्तयः

**पुण्यप्रदेशेषु विभाति गङ्गा भङ्गा तरङ्गा च नगेषु रम्या।**
**भक्ता विनम्राश्च सदा भजन्ति, तामेव पुण्यां भवतारिणीं मे।। (अनिलः)**





(सङ्गोष्ठ्याः चित्राणि)



## सञ्चालितमन्तर्जालीयमध्यापनम्

सम्पूर्णभारते कोरोनाया: कारणात् सर्वा: शिक्षणसंस्था: शिक्षणकार्यार्थं वञ्चिता: सञ्जाता:। परश्चास्मिन् समये अन्तर्जालीयमध्यापनं सर्वश्रेष्ठरूपेण विकल्प: राष्ट्रियसंस्कृतसंस्थानेन स्वीकृत:। सर्वे छात्रा: स्वगृहे उषित्वा कक्षासमयानुसारम् अन्तर्जालमाध्यमेन प्राध्यापकेभ्य पठिष्यन्तीति जूनमासस्य २२ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानात् आदेशो निर्गत:। तदर्थम् एकमन्वेषणमन्तर्जालीयमभवत्, येन ज्ञातं यच्छात्रा: अनेन माध्यमेन पठितुं कति प्रतिशतं योग्या: सन्ति। अत: सर्वे छात्रा: प्राध्यापकाश्च तन्मार्गमनुसरन्त: संस्कृतशास्त्रसंरक्षणे कृतसंकल्पा अभवन्। जुलाईमासस्य १ दिनाङ्कात् सर्वैरन्तर्जालीयव्यवस्थामाध्यमेनाध्ययनकार्यमारब्धम्। एवमेव अन्तर्जालमाध्यमेनान्यान्यपि शैक्षिककार्याणि सर्वै: प्राध्यापकै: कर्मचारिभिश्च सम्पादितानि।

## समायोजितं बहुभाषीयं राष्ट्रियकविसम्मेलनम्



(स्वकाव्यं प्रस्तुवन्त: डॉ. निरञ्जनमिश्रा:)

साहित्यसङ्गोष्ठ्या: सन्ध्यायाम् २९-०२-२०२० दिनाङ्के आधुनिक संस्कृतसाहित्यमेवमनुसन्धानकेन्द्रपक्षत: एकस्य बहुभाषीयकविसम्मेलनस्यायोजनमभूत्। अस्य सम्मेलनस्य सञ्चालनम् आधुनिकविभागस्य हिन्दीभाषाया: प्राध्यापकेन डॉ. वीरेन्द्रसिंहबर्त्वालमहोदयेन कृतम्। यत्र परिसरप्राचार्य: प्रो. के.बी.सुब्बरायुडु: अध्यक्षरूपेण, प्रो.बनमालीबिश्वाल: संयोजकरूपेण, प्रो.भागीरथिनन्द: मुख्यातिथित्वेन, प्रो.वेदप्रकाशउपाध्याय: सारस्वतातिथिरूपेण, डॉ.निरञ्जनमिश्र: मुख्यकवित्वेन चोपस्थिता आसन्। अस्मिन्नवसरे सर्वे परिसरीया: प्राध्यापका अपि समुपस्थिता: आसन्, तत्रैकेन वर्तमानपरिदृश्यमभिलक्ष्य, अपरेण देशस्य स्वतन्त्रतामाश्रित्य, अन्येन व्यंग्यभावपूर्णं स्वकाव्यमत्र प्रस्तुतम्। प्रो. बनमालीबिश्वालमहोदयेन कदा जाने वसन्त: इत्यस्मिन् विषये, प्रो.भागीरथिनन्देन भारतसीम्नो विषये, डॉ.कृपाशंकरशर्मणा मोदीनां विषये, डॉ.शैलेन्द्रप्रसादउनियालेन वैदिकपरम्पराविषये, डॉ. अनिलकुमारेण देवप्रयागविषये, डॉ.वीरेन्द्रसिंहबर्त्वालेन गढवालभाषामाधुर्यविषये, डॉ.दिनेशचन्द्रपाण्डेयेन प्रकृतिसौन्दर्यविषये काव्यपाठ: कृत:, अपि च बहुभिश्छात्रैरपि स्वकाव्यमाध्यमेन स्वप्रतिभाया: प्रदर्शनं कृतम्। अन्ते च अध्यक्षमहोदयेनापि स्वकाव्यं प्रस्तुतम्, तथा च सर्वे उद्बोधिता:। शान्तिपाठेन कार्यक्रमस्य समाप्ति: अभवत्।



(प्राचार्येण सम्मानिता: प्रो.बनमालीबिश्वाला:)

## देशे कोरोनाया: सङ्क्रमणम्



(कोरोनाया: परीक्षणम्)

भारतस्य प्राचीनकालादेव सर्वे भवन्तु सुखिन: इत्यवधारणा विद्यते अपि च वसुधैव कुटुम्बकम् इत्यस्य भावना अस्माकं मनसि दृढा दरीदृश्यते। यदा सम्पूर्णं भारतं प्रगतिपथे स्वकीर्तिं विश्वे प्रसारयति स्म, तस्मिन्नेव कोरोना इति व्याधिना अखिलं भूमण्डलं न केवलं प्रपीडितम् अपितु मानवानां जीवनं नष्टप्रायं कृतम्। मार्चमासस्य प्रथमे सप्ताहे अस्य व्याधे: पदार्पणं भारतेऽपि सञ्जातम्। येन अखिले भारते २० मार्चत: 'लाकडॉउन' जातम्, यस्य प्रभावेण सर्वा: प्रतिक्रिया भारतस्य पिहिता:। य: जन: यत्रास्ति तत्रैव तिष्ठतु एवं भूते प्रथमे आदेशे सामान्यजनस्य जीवनम् अत्यन्तकष्टमयमभवत्। कोऽपि जन: गृहाद् बहिर्न गच्छति स्म। स्पर्शातम् अयं रोग: एकस्मात् जनात् अन्यस्मिन् जने संक्रामतीति कारणात् सर्वाणि आपणानि, सर्वाण्युद्योगसाधनानि, गमनसाधनानि अवरुद्धानि जातानि। अनेन न केवलं भारतस्यापितु विश्वस्याखिलस्य आर्थिक-सामाजिक-राजनैतिक- शैक्षिणिकव्यवस्था: प्रभाविता:। अधुनापर्यन्तमपि न वयं तस्या व्याधे: विमुक्ता:। ईश्वर एव विजानाति तन्मोक्षमार्गं येन पुन: सर्वे निरामया: भविष्यन्ति। तथापि सामूहिकरूपेण जनसमुदायेन प्राणिमात्रस्य या सेवा कृता सा अपूर्वा अकल्पनीया एवासीत्। तत्र विशिष्टरूपेण चिकित्सकानाम्, आरक्षकाणाम्, सामान्यजनानां यथा सहयोगस्य भावना आसीत्, तयैव किञ्चित् स्थैर्यं वयम् आप्तवन्त:।

**भारते या व्यथा दृश्यते मेऽधुना, शूलतुल्यं तया क्षोभते मानसम्।**
**वर्तमाने वयं चिन्तयामस्तथा, भारतीया: कथं सन्तु संरक्षिता:।।** (अनिल:)



# पठनप्रतिज्ञादिवसः

स्वाध्यायान्मा प्रमदः, विद्याभ्यसनेनैव प्रसादयितुमर्हति इत्यादिभिर्वाक्यैः ज्ञायते यद् अध्ययनेनैव विद्या प्रसीदति। अतः पुस्तकानां पठनायास्माकं रुचिर्भवेदिति विचिन्त्य भारतसर्वकारेण ग्रन्थालयान्दोलनजनकानां श्री पी.एन.पणिकरमहोदयानां पुण्यस्मृतौ जूनमासस्य १९ दिनाङ्के पठनदिवसं परिपालयितुं निर्णयः कृतः। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरेण



तेषां स्मृतौ अध्ययनस्य संस्कृतिं प्रोत्साहयितुं किञ्च ताम् आन्दोलनरूपेण निर्मातुम् आनलाइनमाध्यमेन एकः पठनप्रतिज्ञादिवसकार्यक्रमः आयोजितः। यस्य सञ्चालनं पुस्तकालयाध्यक्षेण श्रीनवीनडोबरियालमहोदयेन कृतम्। तत्र गूगलमीटद्वारा सर्वैः छात्रैः, प्राध्यापकैश्च तत्प्रतिज्ञापत्रं पूरितम्। कोरोनायाः प्रभावादयं कार्यक्रमः अन्तर्जालीय आसीत्। जूनमासस्य १९ दिनाङ्के २०१७ तमे देशस्य प्रधानमन्त्रिणा नरेन्दमोदिना २२ तमः पठनप्रतिज्ञाकार्यक्रमः आरब्धः तदनु सर्वेषां कृते शिक्षा भवेत् इति आह्वानमपि कृतम्। अस्मिन् वर्षे २५ तमः पठनप्रतिज्ञाकार्यक्रमः सञ्जातः। एवमध्ययनपम्पराभिवृद्धये अध्ययनदिवसस्य कार्यक्रमः श्रीरघुनाथकीर्तिपरिसरेण सोत्साहेन परिपालितः।

# योगदिवसस्यायोजनम्



(योगासने छात्रः)

योगः कर्मसु कौशलम्, योगो भवति दुःखहा चेत्यादिभिः श्रीमद्भगवद्गीतावचनैः, अपि च शरीरमाद्यं खलु धर्मसाधनमिति धिया शरीरस्य रक्षणं तत्कृते च योगाभ्यासः परमावश्यकः। तदर्थं प्रतिवर्षं जूनमासस्य २१ दिनाङ्के सम्पूर्णराष्ट्रे योगदिवसस्य परिपालनं क्रियते। श्रीरघुनाथकीर्तिपरिसरेऽपि प्रतिवर्षमस्यायोजनं भवति। अस्मिन् वर्षे यतोहि सम्पूर्णदेशे कोरोनायाः स्थितिः कष्टमयी आसीत्, अतः परिसरप्राचार्यस्य प्रो.के.बी.सुब्बरायुडुमहोदयस्याध्यक्षत्वे, पुस्तकालयाध्यक्षस्य श्रीनवीन डोबरियालमहोदयस्य च संयोजने अन्तर्जालमाध्यमेनास्य कार्यक्रमस्यायोजनमभवत्। सर्वे प्राध्यापकाः, छात्राश्च योगाभ्यासं स्वनिवासस्थाने कृतवन्तः। परिसरनिदेशकाः प्रो.के.बी.सुब्बरायुडुमहोदयाः छात्रावासात्, प्रो.बनमालीबिश्वालमहोदयाः प्रयागराजात्, डॉ.सच्चिदानन्दस्नेही बिहारप्रदेशात्, डॉ. कृपाशंकरशर्मा भोपालतः, डॉ.अनिलकुमारः देवप्रयागात्, डॉ. दिनेशचन्द्रपाण्डेयः देवप्रयागात्, श्रीनवीनडोबरियालः श्रीनगरात्, अन्ये च प्राध्यापका अपि स्वस्वस्थानात् संयुक्ता अभवन्। प्रातः १०:१५ वादने अन्ताराष्ट्रिययोगदिवसस्यायोजने समेषां योगाभ्यासं कुर्वतां चित्राण्यपि समागतान्यासन्। एवम्प्रकारेणास्मिन् वर्षे योगदिवसस्यायोजनं श्रीरघुनाथकीर्तिपरिसरे सफलतया अभवत्।



(योगासने प्राध्यापकः)

# ग्रीष्मावकाशस्य समाप्तिः, परिसरस्योद्घाटनञ्च



(कोरोनानिरक्षणम्)

कोरोनावशात् शैक्षणिककार्याणि किञ्चिद् अवरुद्धानि अभवन्, अतो राष्ट्रियसंस्कृतसंस्थानेन मईमासस्य २० दिनाङ्कात् जूनमासस्य १७ दिनाङ्कपर्यन्तं शैक्षणिकावकाशो घोषितः। तदनन्तरं जूनमासस्य १८ दिनाङ्के परिसर उद्घाटितः, परं कोरोनायाः प्रभावः सम्पूर्णविश्वे एवम्भूतः आसीत् यत् पुनः आदेशः समागतः सर्वे प्राध्यापकाः गृहादेव सर्वाणि कार्याणि कुर्वन्तु इति। अधुनापि आधिक्येन आनलाइनमाध्यमेन कार्यं प्रचलति।



(कोरोनानिरक्षणम्)

## प्रारब्धः छात्राणां प्रवेशः

स्वाध्यायान्मा प्रमदः इति धिया अपि च संस्कृतस्य प्रचाराय प्रसाराय छात्राणां हिताय च राष्ट्रियसंस्कृतसंस्थानेन सर्वेषां छात्राणां कृते जुलाईमासस्य २९ दिनाङ्के प्रवेशप्रक्रियार्थम् आदेशो निस्सारितः। तद्यथा–



* पञ्जीकरणम्– अगस्तमासस्य ५ दिनाङ्कात् ३१ दिनाङ्कपर्यन्तम्।
* प्रवेशपरीक्षा– सितम्बरमासस्य १ दिनाङ्कात् ३ दिनाङ्कपर्यन्तम्।
* प्रवेशपरिणामस्य घोषणा– सितम्बरमासस्य ५ दिनाङ्के
* प्रवेशशुल्कार्पणम् – सितम्बरमासस्य ६ दिनाङ्कात् १० दिनाङ्कपर्यतम्
* कक्षारम्भः – सितम्बरमासस्य ११ दिनाङ्कात्

अनेन समयानुसारेणैव प्रवेशपरीक्षासमित्या सर्व कार्यं सम्पादितम्। छात्राणामन्तर्जालीया प्रवेशपरीक्षा सितम्बरमासस्य ३ दिनाङ्के ११:३० वादनात् १:०० वादनपर्यन्तं सञ्जाता, तदनु निर्धारिते ५म–दिनाङ्के परीक्षापरिणामस्य घोषणा अभवत्, १० दिनाङ्कपर्यन्तं शुल्कार्पणं जातम्, ११ दिनाङ्कात् कक्षा आरब्धा।

## परिपालितः 74 तमः स्वतन्त्रतादिवसः

उच्यते खलु गायन्ति देवा किल गीतकानि धन्यास्तु मे भारतभूमिभागः इति अत एव अस्माकं देशो वस्तुतो धन्यः यत्र देवा अपि अवतरितुमिच्छन्ति। एतादृशस्य राष्ट्रस्य आंग्लशासकात् विमोक्षणाय बहुभिर्भारतीयैः स्वप्राणाहुतिः प्रदत्ता। तेषां स्मृतौ राष्ट्रपर्व इदं सम्पूर्णभारते हर्षोल्लासेन मन्यते। ७४ तमः स्वतन्त्रतादिवसः श्रीरघुनाथकीर्तिपरिसरेणापि तथैव समायोजितः। प्रातःकाले परिसरस्य प्राचार्यः प्रो. के.बी. सुब्बरायुडुः, सर्वे प्राध्यापकाश्च परिसरप्राङ्गणे एकत्रिता अभवन्। तदनन्तरं परिसरप्राचार्येण ध्वजोत्तलनं कृतम्, सर्वेषां कृते स्वतन्त्रतादिवसस्य शुभकामनाश्च प्रदत्ताः। प्राचार्यमहोदयेनोक्तम्– अस्माकं देशे अनेके एतादृशा जनाः सञ्जाताः येषां पुण्यप्रतापेन वयमद्य स्वतन्त्ररूपेण विचरामः। अतः अस्माभिरपि स्वदेशस्य रक्षायै सर्वदा मनसा, वाचा, कर्मणा तत्परैः भाव्यम्। ततश्चान्तर्जालमाध्यमेन छात्राणामपि बहुविधाः सांस्कृतिककार्यक्रमाः जाताः। प्राध्यापकैरपि स्वस्वविचाराः अवसरेऽस्मिन् समुपस्थापिताः। अन्ते मिष्टान्नवितरणेन सह कार्यक्रमः समाप्तिं गतः। अस्य कार्यक्रमस्य सञ्चालनं व्याकरणविभागस्य प्राध्यापकेन डॉ.श्रीओमशर्मणा कृतमासीत्।



(ध्वजमुत्तलयन् परिसरप्राचार्यः)

## नूतनशिक्षानीतिकार्यक्रमः




भारतसर्वकारेण शिक्षायाः विकासाय सर्वेषां कृते शिक्षा अनिवार्या कृता। परञ्च तथापि शिक्षा क्षेत्रे तथाविधं चिन्तनम् अनुसन्धानश्च नैव जाते, याभ्यां सर्वे गुणवत्तापूर्णा शिक्षामवाप्नुयुः। अतः सर्वेषां सर्वाङ्गीणविकासाय भारतसर्वकारेण नूतना शिक्षानीतिः आनीता। तस्याः ज्ञानं सम्यक्तया सर्वेषां शिक्षाविदां कृते स्यादतः सर्वासु शिक्षणसंस्थासु विषयेऽस्मिन् विविधा सङ्गोष्ठ्यः समायोजिताः। उत्तराखण्डसर्वकारेणापि १९.०८.२०२० दिनाङ्के एको बृहत्तमः कार्यक्रमः **'नई शिक्षा नीति एवं संस्कृत'** इत्याख्यः आयोजितः, यत्र विशिष्टशिक्षाविदः, कुलपतयः, सर्वकारस्याधिकारिणश्च समवेताः अभूवन्। तस्मिन् क्रमे श्रीरघुनाथकीर्तिपरिसरस्यापि सहभागिता तत्रासीत्। माननीयः सञ्जूध्यानी पत्रमेकं तदर्थं प्रेषितवान्, तत्सन्दर्भे कार्यक्रमस्य संकेतप्रेषणार्थं (link) परिसरप्राचार्यद्वारा साहित्यविभागस्य अध्यापकः डॉ. अनिलकुमारः नियुक्तः, येन समेषां प्राध्यापकानां कृते सूचनेयं प्रेषिता। ११वादनात् १:०० वादनपर्यन्तं कार्यक्रमस्यायोजने सर्वे परिसरीयाः प्राध्यापकाः, कर्मचारिणः, छात्राश्च सम्मिलिताः सञ्जाताः। अस्मिन् कार्यक्रमे शिक्षानीतेः गम्भीरचिन्तनं जातम्। कथमियं नीतिः संस्कृतस्य कृते महत्त्वपूर्णा विद्यते अस्मिन् विषये संस्कृतशिक्षाविद्भिश्चर्चा कृता। एवं नूतनशिक्षानीतिकार्यक्रमः सम्पूर्णराज्ये परिसरे च महतोल्लासेन समायोजितः।

## गणेशोत्सवस्यायोजनम्



(गणेशपूजनं कुर्वन् परिसरप्राचार्यः)

भारतीयपर्वसु गणेशचतुर्थीपर्व सम्पूर्णहिन्दूसमाजे महतोल्लासेनायोज्यते। विविधेषु राज्येषु गणेशस्यार्चना विविधप्रकारेण क्रियते। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरेऽपि अस्योत्सवस्यायोजनं हर्षोल्लासेन क्रियते। अस्मिन् वर्षे गणेशोत्सवस्यावसरे प्रातःकाले एव सर्वे परिसरकर्मचारिणः, प्राध्यापकाः, छात्राश्च परिसरस्य प्राचार्येण प्रो.के.बी.सुब्बरायुडुमहोदयेन सह पूजार्थं परिसरस्य प्राङ्गणे समवेताः अभूवन्। वेदविभागाध्यक्षेण डॉ.शैलेन्द्रप्रसादउनियालेन शास्त्रोक्तविधिना गणपतेः समभ्यर्चना कारिता। बहुभिश्छात्रैः गणपतिस्तोत्राणां पाठः कृतः, प्राध्यापकैश्च स्वकाव्यपाठादिकमपि कृतम्। परिसरप्राचार्येणावसरेऽस्मिन् सर्वे उद्बोधिताः यत् पूजाकर्मविधानेन जनाः न केवलं मानसिकीं शान्तिमाप्नुवन्ति, अपितु जीवनस्य सर्वेषु क्षेत्रेषु सकारात्मकं चिन्तनमपि कुर्वन्ति। अस्मिन् प्रसङ्गे व्याकरणविभागाध्यक्षेण प्रो.बनमालीबिश्वालमहोदयेन स्वरचितं गणपतिस्तोत्रं श्रावितम्। एवं श्रीरघुनाथकीर्तिपरिसरे गणेशोत्सवस्यायोजनमभवत्।

## स्वतन्त्रतादिवससन्ध्यायां समायोजितं राष्ट्रियकविसम्मेलनम्

सर्वेषां भारतीयानां मनसि राष्ट्रप्रेम्णः भावना दृढतरा विद्यत एव। तथापि स्वतन्त्रतादिवसे तु सा भावना आधिक्येन दरीदृश्यते। कश्चिद् भाषणेन, अन्यः काव्येन च स्वहृदये सन्निहितान् भावान् प्रकटयत्येव। श्रीरघुनाथकीर्तिपरिसरेणावसरेऽस्मिन् कोरोनाविषयकमखिलभारतीयकविसम्मेलनमायोजितम्। यत्र देशस्य विभिन्नप्रान्तेभ्यः त्रिंशत् संस्कृतकवयः स्वक. ाव्यपाठमाचरितवन्तः। अस्य कार्यक्रमस्य अध्यक्षः परिसरस्य निदेशकः प्रो. के.बी.सुब्बरायुडुः, संयोजकश्च व्याकरणविभागाध्य क्षः प्रो.बनमालीबिश्वालश्चास्ताम्। कार्यक्रमस्य सञ्चालनं वेदविभागस्य डॉ.शैलेन्द्रप्रसादउनियालः, साहित्यविभागस्य च डॉ. अनिलकुमारः कृतवन्तौ। तत्र १.प्रो.रविन्द्रकुमारपण्डा(बडौदा), २.डॉ.परागजोशी(नागपुरम्), ३.डॉ.कौशलतिवारी(राजस्थानम्), ४ .डॉ.बुद्धेश्वरषडङ्गी(कोलकाता), ५.डॉ.जगमोहनाचार्यः(खडगपुरम्), ६.प्रो.विजयपालशास्त्री (देवप्रयागः), ७.डॉ.वीरेन्द्रबर्त्वालः (देवप्रयागः),८.डॉ.निरञ्जनमिश्रः(हरिद्वारम्), ९.डॉ.शैलेशतिवारी(हरिद्वारम्), १०.डॉ.हरेकृष्णमेहरः(सम्बलपुरम, ओडिशाप्रदेशः), ११.डॉ.नारायणदाशः(कॉलकाता), १२.डॉ.रामविनयसिंहः(देहरादूनम्), १३.डॉ.अरुणनिषादः(सुल्तानपुरम्), १४.डॉ.अरविन्दतिवारी (बागपतम्), १५.डॉ.ब्रजेन्द्रकुमारसिंहदेवः(हरिद्वारम्), १६.डॉ.अरुणरञ्जनमिश्रः (शान्तिनिकेतनम्), १७.डॉ.अवधेशबिजल्वाणः (देवप्रयागः) १८.डॉ.आशुतोषगुप्तः (श्रीनगरम्) १९.सन्दीपकोठारी, (देवप्रयागः) २०. डॉ.मनोहरलाल आर्यः (पतञ्जलिविद्यापीठः), २१.डॉ.प्रियव्रतमिश्रः(विहारप्रदेशः), २२.डॉ.धनञ्जयमिश्रः (कटरा जम्मू), २३.डॉ.सोमनाथदाशः (तिरुपतिः) चेति बहवः कवयः आसन्।




(अखिलभारतीयकविसम्मेलनस्य मुखपृष्ठः)

## परिपालितः संस्कृतसप्ताहोत्सवः



(अभिभाषमाणाः प्रो.रूपकिशोरशास्त्रिणः)

संस्कृतभाषायां सर्वं ज्ञानं निहितमस्ति, भाषेयं देवभाषा, गीर्वाणी, देववाणी इत्यादिभिर्नामभिर्व्यवह्रियते। संस्कृतस्य रक्षणं, संवर्धनञ्च केन्द्रीयसंस्कृत-विश्वविद्यालयस्य मूलभूतमुद्देश्यं विद्यते। संस्कृतस्य कथं संवर्धनं स्यात्तदर्थं भारतसर्वकारेणापि विविधा योजनाः परिचालिताः सन्ति। शैक्षणिकसंस्थासु संस्कृतसम्बद्धा कार्यक्रमाः सप्ताहपर्यन्तमायोज्यन्ते स च सप्ताहः संस्कृतसप्ताहरूपेण परिपाल्यते। श्री रघुनाथकीर्तिपरिसरे अगस्तमासस्य ०३ दिनाङ्कात् ०९ दिनाङ्कपर्यन्तम् अस्यायोजनमस्मिन् वर्षे अभवत्। प्रथमदिवसे कार्यक्रमस्योद्घाटने मुख्यातिथित्वेन गुरुकुलकांगडीविश्वविद्यालयस्य कुलपतयः प्रो.रूपकिशोरशास्त्रिणः आसन्। तेषां व्याख्याने संस्कृतस्याभिवृद्धिः कथं स्यात्, केन प्रकारेण वयं संस्कृतस्य प्राचीनपरम्परारक्षणे समर्थाः भविष्यामः, वर्तमानकाले संस्कृतस्य का दशा वर्तते, कुत्र संस्कृतेन सह समस्याः सन्ति तेषां समाधानम् अस्माभिः कथं कर्त्तव्यम् एवम्भूताः अंशाः आसन्। अस्मिन् दिवसे कार्यक्रमस्यारम्भे वैदिकमङ्गलाचरणं डॉ.श्रीओमशर्मणा, लौकिकमङ्गलाचरणं डॉ.अनिलकुमारेण, स्वागतभाषणं प्रो.बनमालीबिश्वालेन, आध्यक्षीयमुद्बोधनं परिसरप्राचार्येण प्रो.के.बी.सुब्बरायुडुमहोदयेन, धन्यवादज्ञापनं डॉ.आर.बालमुरुगनमहोदयेन, शान्तिपाठः डॉ.कृपशङ्करशर्मणा, सञ्चालनं डॉ.शैलेन्द्रप्रसादउनियालेन, सहसञ्चालनं डॉ.अनिलकुमारेण तथा डॉ.सुरेशशर्मणा च विहितानि। द्वितीये दिवसे छात्रणां कृते संस्कृतनिबन्धलेखनस्पर्धा (वर्तमानकाले योगायुर्वेदयोरुपयोगिता) भगवद्गीताकण्ठपाठस्पर्धा च डॉ. दिनेशचन्द्रपाण्डेयस्य संयोजने, डॉ.वीरेन्द्रबर्त्वाल डॉ.युवराजशर्मणोः सहसंयोजने आयोजिते। तृतीयदिवसे डॉ.श्रीओमशर्मणः संयोजने, डॉ.अवधेशचन्द्रबिजल्वाण डॉ.अरविन्दगौरयोः सहसंयोजने छात्रेभ्यः संस्कृतभाषणस्पर्धा( वैश्वीकरणयुगे आत्मनिर्भरभारतं कथम्) संस्कृतसुभाषितप्रसारस्पर्धा-संस्कृतप्रश्नस्पर्धाः समायोजिताः। चतुर्थदिवसे शास्त्रेषु सङ्क्रामकरोगनिवारणोपायाः इति विषयमाधारीकृत्य राष्ट्रिया सङ्गोष्ठी आयोजिता, यस्याः सञ्चालनं डॉ.शैलेन्द्रप्रसादउनियालेन, सहसञ्चालनं डॉ.कृपाशङ्करशर्मणा विहिते। तत्र देशस्य विविधेभ्यः प्रान्तेभ्यः पत्रवाचकाः समागताः आसन्। पञ्चम-षष्ठ-सप्तमदिवसेषु विशिष्टव्याख्यानमालानाम् आयोजनम् अभवत्। एतेषां सर्वेषां कार्यक्रमाणाम् अन्तर्जालीयसमायोजनस्य आयोजकौ पुस्तकालयाध्यक्ष-श्रीनवीनडोबरियाल-सङ्गणकप्राध्यापकश्रीपंकजकोटियालौ चास्ताम्। अस्य सम्पूर्णकार्यक्रमस्य सञ्योजकः न्यायविभागाध्यक्षः डॉ. सच्चिदानन्द. स्नेहीमहोदयः आसीत्। प्रतियोगितासु निर्णायकत्वेनोपस्थिताश्चासन् परिसरस्य प्राचार्याः प्रो. के.बी.सुब्बरायडुमहोदयाः, साहित्यविभागाध्यक्षाः प्रो.विजयपालशास्त्रिणः, व्याकरणविभागाध्यक्षाः प्रो.बनमालीबिश्वालमहोदयाः। एवं महतोल्लासेन संस्कृतसप्ताहस्यायोजनं श्रीरघुनाथकीर्तिपरिसरेण कृतम्।

## समायोजितं व्याकरणविषयकं विशिष्टव्याख्यानम्



(अन्तर्जालीय उपवेशने प्रो.बनमालीबिश्वालः)

संस्कृतसप्ताहस्य विशिष्टव्याख्यानमालान्तर्गतं व्याकरणविभागाध्यक्षाणां प्रो.बनमालीबिश्वालमहोदयानामेकं विशिष्टव्याख्यानम् संस्कृतव्याकरणशास्त्रस्य अद्यतनसन्दर्भे उपयोगिता इति विषयमाधारीकृत्य आयोजितम्। अस्मिन् व्याख्याने व्याकरणशास्त्रस्य यानि प्राचीनार्वाचीनानि प्रयोजनानि, भाषायां भाषाविज्ञाने च व्याकरणस्य किं वैशिष्ट्यम्, सामान्यजनानां कृतेऽपि किमर्थं व्याकरणस्य ज्ञानमावश्यकम्, व्याकरणज्ञानं विना काः काः समस्याः समुत्पन्ना भवन्ति इत्यादीनामुपविषयाणामालोके आचार्यबिश्वालमहोदयेन सम्यक्तया प्रतिपादितम्। अन्ते प्रतिभागीभिश्चानेके प्रश्नाः समुत्थापिताः येषां समाधानं बिश्वालमहोदयेन कृतम्। अस्य कार्यक्रमस्य सञ्चालनं डा.श्रीओमशर्मणा विहितम्, मङ्गलाचरणं डा. दिनेशचन्द्रपाण्डेयेन, विषयोपस्थापनं डा.आर.बालमुरगनमहोदयेन, धन्यवादज्ञापनञ्च डा.सुरेशशर्मणा कृतम्। अन्ते च शान्तिपाठेन सह कार्यक्रमस्यास्य समाप्तिरभवत्।

## समायोजितः हिन्दीपक्षः



(अन्तर्जालीय उपवेशने परिसरप्राचार्यः)

हिन्दी अस्माकं राष्ट्रभाषा विद्यते। अतः तस्याः संरक्षणम् अस्माकं सर्वेषां दायित्वम्। अतः प्रत्येकस्मिन् वर्षे सितम्बरमासे हिन्दीपक्षस्यायोजनं सर्वासु संस्थासु क्रियते। अनेन समेषां हृदि हिन्दीभाषां प्रत्यादरो दृश्यते। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरेणापि प्रतिवर्षम् अस्यायोजनम् अतीवहर्षोल्लासेन क्रियते। सितम्बरमासस्य १४ दिनाङ्कात् २८ दिनाङ्कपर्यन्तमयं कार्यक्रमोऽत्र समायोजितः। सम्पूर्णस्य कार्यक्रमस्य अध्यक्षरूपेण परिसरस्य निदेशकाः प्रो.के.बी.सुब्बरायुडुमहोदयाः, संयोजकाश्च न्यायविभागस्य प्राध्यापकाः डॉ.आर.बालमुरुगनमहोदयाः आसन्। १४ दिनाङ्के अस्य कार्यक्रमस्योद्घाटने मुख्यातिथिरूपेण प्रो.शिशिरकुमारपाण्डेयाः केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊ परिसरात् समागताः, तैः हिन्दीभाषायाः विविधपक्षाणामेतिहासिकस्वरूपाणां विषये स्वविचाराः प्रस्तुताः। सारस्वतातिथिरूपेण प्रो. जगदेवकुमारशर्ममहोदयाः श्रीलालबहादुरराष्ट्रियसंस्कृतविश्वविद्यालयस्य नवदेहलीतः ये समुपस्थिताः, तैः राष्ट्रियशिक्षानीतिविषये भारतीयभाषाणां विविधपक्षाः इत्यस्मिन् विषये स्वव्याख्यानं प्रदत्तम्। परिसरीयप्राध्यापका अपि अवसरेऽस्मिन् स्वविचारान् उपस्थापितवन्तः। कार्यक्रमस्य संचालनं डॉ.अनिलकुमारेण कृतमासीत्। २६ दिनाङ्के सर्वेषां परिसरीयकर्मचारिणां कृते एका स्पर्धा (कार्यालीयशब्दावलीनिबन्धः), तथा चान्या सङ्गणकटङ्कणस्पर्धा च समायोजिते, यत्र सोत्साहपूर्वकं सर्वे कर्मचारिणः भागग्रहणं कृतवन्तः। अस्याः स्पर्धायाः सञ्चालनं पुस्तकालयाध्यक्षेण श्रीनवीनडोबरियालेन कृतम्। २७ दिनाङ्के ११:०० वादने छात्रेभ्यः हिन्दीसामान्यज्ञानस्पर्धायाः आयोजनं गूगलमीटद्वारा डॉ .अनिलकुमारेण श्रीनवीनडोबरियालमहोदयेन च कारितम्। २८ दिनाङ्के समापनावसरे मुख्यातिथिरूपेण उत्तराखण्डसंस्कृतविश्वविद्यालयात् हरिद्वारात् डॉ. उमेशकुमारशुक्लमहोदयानां हिन्दीसाहित्यस्य विकासपरम्परा इत्यस्मिन् विषये अभिभाषणमभवत्। यत्र सारस्वतमुद्बोधनं परिसरनिदेशकैः प्रो.के.बी.सुब्बरायुडुमहोदयैः, अध्यक्षीयभाषणं प्रो. बनमालीबिश्वालमहोदयैः, स्वागतभाषणं डॉ.सच्चिदानन्दमहोदयेन, धन्यवादज्ञापनं डॉ.कृपाशंङ्करशर्ममहोदयेन, सञ्चालनं च डॉ. अनिलकुमारेण कृतानि। एवं हिन्दीपक्षस्यायोजनं परिसरे महतोल्लासेन सम्पन्नम्।



(अन्तर्जालीय उपवेशने)

## श्रीरघुनाथकीर्तिपरिसरे स्वच्छभारताभियानम्

स्वच्छतया सह मानवस्य तथैव सम्बन्धो भवति यथा मानवशरीरस्य स्वास्थ्येन सह। अतः स्वच्छता अस्माकं परमो धर्मः। तस्मात्कारणादेव अक्टूबरमासस्य २१ दिनाङ्के सम्पूर्णभारते स्वच्छभारताभियानरूपेण परिपाल्यते। येन सर्वेषां मनसि भावनेयमुत्पादिता भवेद् यत् राष्ट्रस्योन्नयने स्वच्छताया महत्त्वपूर्णं योगदानं विद्यते। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरेऽपि स्वच्छताभियानमायोजितम्। दिवसेऽस्मिन् सर्वे परिसरीयाः प्राध्यापकाः परिसरे परिसरं परितश्च सामूहिकरूपेण स्वच्छताभियानमाचरितवन्तः। स्वच्छतानन्तरं परिसरप्राचार्याणामुद्बोधनमभूत् तैरुक्तं यत् स्वच्छता अस्माकं जीवनस्याभिन्नरूपेण विद्यमानमेकमङ्गं वर्तते यद्विना वयं स्वस्थजीवनस्य कल्पनां नैव कर्तुं शक्नुमः। छात्रैरपि स्वकविताः स्वच्छभारताभियानविषये पठिताः। एवं श्रीरघुनाथपरिसरेण स्वच्छभारताभियानमायेजितम्।



(स्वच्छताभियाने परिसरीयाश्छात्राः)

## मादकद्रव्याणां व्यसननिवारणे आयुर्वेदस्योपादेयताविषये आयोजितं विशिष्टव्याख्यानम्



(अन्तर्जालीय उपवेशने)

भारतस्य राष्ट्रपितुः महात्मगान्धिनः अपि च श्रीलालबहादुरशास्त्रिणो जन्मदिवसमभिलक्ष्य अक्टूबरमासस्य २ दिनाङ्के सर्वासु शैक्षणिकसंस्थासु विविधाः कार्यक्रमा आयोज्यन्ते। केन्द्रीयविश्वविद्यालयस्य श्रीरघुनाथकीर्ति परिसरेणावसरेऽस्मिन् अन्तर्जालमाध्यमेन 'मादकद्रव्याणा व्यसननिवारणे आयुर्वेदशास्त्रस्योपयोगिता' इति विषयमवलम्ब्य एकं विशिष्टं व्याख्यानमायोजितम्। तत्र मुख्यवक्तृरूपेण साहित्यविभागस्याध्यक्षः प्रो.विजयपालशास्त्री आसीत्। येन मादकद्रव्याणि कथम् अस्माकं जीवनस्य व्याधिभूतानि सन्ति, कथञ्च तेभ्यो मोक्षमार्गेण सर्वे सुखिनो निरामयाश्च भवितुमर्हन्तीति सम्यक्तयोद्बोधितम्। कार्यक्रमस्य सञ्चालनं वेदविभागाध्यक्षः डॉ.शैलेन्द्रप्रसादउनियालः कृतवान्। तत्र वैदिकमङ्गलाचरणं श्रीओमशर्मणा, लौकिकमङ्गलाचरणं डॉ.दिनेशचन्द्रपाण्डेयेन, स्वागतभाषणं डॉ.अनिलकुमारेण, विषयप्रवर्तनं डॉ .आर.बालमुरुगनेन, धन्यवादज्ञापनं डॉ.कृपाशंकरशर्मणा च विहितानि। कार्यक्रमस्याध्यक्षपदं निर्वहद्भिः परिसरप्राचार्यैः प्रो. के.बी. सुब्बरायुडुमहोदयैः आयुर्वेदस्योपयोगिता कथमस्माकं जीवने वर्तते, कथञ्चास्य संरक्षणं करणीयमिति प्रतिपादितम्। अस्य कार्यक्रमस्य संयोजकः डॉ. सच्चिदानन्दस्नेही न्यायविभागाध्यक्षः आसीत्।

## स्वापकौषधेः मनःप्रभावपदार्थस्य चाधिनियमविषये विशिष्टव्याख्यानम्



(अन्तर्जालीय उपवेशने)

केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरेण अक्टूबरमासस्य ४ दिनाङ्के भारतसर्वकारस्य सामाजिकन्यायाधिकारितामन्त्रालयस्य दिशानिर्देशानुसारेण मादकद्रव्याणां व्यसन-निवारणाय राष्ट्रियकार्ययोजनान्तर्गत अन्तर्जालमाध्यमेनैकं विशिष्टव्याख्यानम्- 'स्वापकौषधेः मनःप्रभावपदार्थस्य चाधिनियमः १९८५ एकः परिचयः' इति विषयमङ्गीकृत्य शिवानी महोदयाया (एडवोकेट बारकाउन्सिलिंग आफ उत्तराखण्ड, न्यायालयः हरिद्वारम्) जातम्, यत्र तया विभिन्नमादकद्रव्याणां व्यसनकारणात् कथं दण्डव्यवस्था वर्तते, कथं सामाजिकजनाः अनेन प्रभाविता भवन्ति, समाजे एवम्भूतमपराधं निवारयितुं के के उपायाः अस्माभिरङ्गीकार्याः इति सर्वमुक्तम्। कार्यक्रमस्य अध्यक्षरूपेण विराजमानैः परिसरप्राणभूतैः प्रो. के.बी.सुब्बरायुडुमहोदयैरपि सर्वे सम्बोधिताः। अस्य कार्यक्रमस्य संयोजकः डॉ. सच्चिदानन्दस्नेही न्यायविभागाध्यक्षः आसीत्। कार्यक्रमस्य संचालनं आङ्गलभाषायाः प्राध्यापकेन डॉ. अवधेशचन्द्रबिजल्वाणेन, मङ्गलाचरणं डॉ. शैलेन्द्रप्रसादउनियालेन, स्वागतम् डॉ.अरविन्दगौरेण, धन्यवादज्ञापनं डॉ. सुरेशशर्मणा कृतानि। अन्ते शान्तिपाठेन सह कार्यक्रमः समाप्तिं गतः।



(अन्तर्जालीय उपवेशने)

**नित्यं प्रभाते रघुनाथगाथां गायन्ति भक्ता रसभावपूर्णाम्।**
**देवाः प्रविष्टा जनमानसं च स्वर्गोपमं भाति धरातलं तत्।।** (अनिलः)

## समायोजिता अन्तर्जालीया शास्त्रीतृतीयवर्षस्य परीक्षा

सम्पूर्णभारतस्य वर्तमानसमये दयनीया दशा विद्यते कोरोनाकारणात्। यस्य प्रभावः सर्वेषु क्षेत्रेष्वपतत्। शिक्षायामपि छात्राणां जीवनं कष्टमयं जातमासीत्। तथापि केन्द्रीयविश्वविद्यालयस्य संकल्पः कथमपि संस्कृतस्यावनतिर्न स्यात्तदर्थं तेन योजनापूर्णरीत्या छात्राणामन्तर्जालीया परीक्षा (सितम्बरमासस्य 16 दिनाङ्कात् 25 दिनाङ्कपर्यन्तम्) सम्पादिता। श्रीरघुनाथकीर्तिपरिसरेण तथैव सर्वेषां छात्राणामन्तर्जालमाध्यमेन परीक्षा आयोजिता। परिसरस्य प्राचार्याणां प्रो. के.बी. सुब्बरायुडुमहोदयानां निर्देशने एका परीक्षासमितिः गठिता, यस्यां संयोजकत्वेन डॉ.अनिलकुमारः, सहसंयोजकत्वेन च श्रीपंकजकोटियालः आस्ताम्। एवं व्हाटसैपमाध्यमेन छात्राणामेकं समूहं निर्माय शास्त्रीतृतीयवर्षस्य परीक्षा सफलतापूर्वकं सम्पादिता।

## श्रीरघुनाथपरिसरे स्वाध्यायकेन्द्रस्य स्थापना

केन्द्रीयसंस्कृतविश्वविद्यालयस्यानेका योजना संस्कृतस्य विकासाय निरन्तरं प्रचलन्त्यः सन्ति। ये छात्राः नियमितरूपेणाध्ययनं कर्तुमिच्छन्ति ते नियमितरूपेण प्रवेशार्हाः भवन्ति, परं च केचन आजीविकाया उद्योगवशात् , गृहकार्यवशात्, धनाभावाच्च नियमितरूपेण नैव पठितुं शक्नुवन्ति। एतादृशानां छात्राणां कृते मुक्तस्वाध्यायपीठस्य स्थापना कृतास्ति यत्र छात्राः मुक्तरूपेण स्वाध्यायं कर्तुं शक्नुवन्ति। केन्द्रीयसंस्कृतविश्वविद्यालयेन सर्वेषु परिसरेषु अस्य केन्द्राणि स्थापितानि सन्ति। श्रीरघुनाथकीर्तिपरिसरेऽपि नवम्बरमासस्य ७ दिनाङ्के स्वाध्यायकेन्द्रस्य स्थापनायाः विषये पत्रं समागतम्। तदनु श्रीरघुनाथकीर्तिपरिसरे स्वाध्यायकेन्द्रस्य स्थापना जाता। यस्य समन्वयकत्वेन साहित्यविभागप्राध्यापकस्य डॉ.अनिलकुमारस्य नियुक्तिः सञ्जाता। अत्र सम्प्रति सर्वे सेतुपाठ्यक्रमाः (प्राक्शास्त्रीसेतुः, शास्त्रीसेतुः, आचार्यसेतुश्च), प्राक्शास्त्रीकक्षा, संस्कृतपत्रकारिताप्रमाणपत्रपाठ्यक्रमः, पालिप्राकृतप्रमाणपत्रपाठ्यक्रमश्च सञ्चाल्यन्ते। शीघ्रमेव शास्त्रीकक्षायाः आचार्यकक्षायाश्च पाठ्यक्रमः आरम्भो भविष्यति। किञ्चात्र परिवहनप्रमाणपत्रपाठ्यक्रमस्य, आयुर्वेदप्रमाणपत्रपाठ्यक्रमस्य च सञ्चालनस्य योजना मुक्तस्वाध्यायपीठस्य वर्तते।




## राष्ट्रियसंस्कृतसंस्थानम् अधुना केन्द्रीयसंस्कृतविश्वविद्यालयत्वेन परिवर्तितं

भारतसर्वकारस्य महता प्रयासेन संस्कृतज्ञानां चोत्साहेन संस्कृतजगति एकं विशिष्टं परिवर्तनमभवत्। यः संस्कृतानुरागिणां स्वप्नः आसीत्, सः पूर्णतां गतः। भारतसर्वकारस्य राजपत्रे द्वितीयभागस्य तृतीये खण्डे अप्रैलमासस्य १७ दिनाङ्के मानवसंसाधनशिक्षामन्त्रालयेन (उच्चतरशिक्षाविभागः, भाषाप्रधानः) अधिसूचनेयं प्रकाशिता यद् भारतस्य त्रयो मानितविश्वविद्यालयाः (राष्ट्रियसंस्कृतसंस्थानम् नवदेहली, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् नवदेहली तथा राष्ट्रियसंस्कृतविद्यापीठम् तिरुपतिः) केन्द्रीयसंस्कृतविश्वविद्यालयरूपेण परिवर्तिताः। एतेषां परिवर्तितानि नामानि अधुना केन्द्रीयसंस्कृतविश्वविद्यालयः (पूर्वं राष्ट्रियसंस्कृतसंस्थानम्), श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः(पूर्वंश्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठम्), राष्ट्रियसंस्कृतविश्वविद्यालयः (पूर्वं राष्ट्रियसंस्कृतविद्यापीठम्)च सन्ति। केन्द्रीयसंस्कृतविश्वविद्यालयस्य सर्वे परिसरा अपि केन्द्रीयविश्वविद्यालय इति नाम्ना संयुक्ताः भविष्यन्ति। परिसरस्य यत्पूर्वं प्राचार्यपदमासीत् तदधुना निदेशकपदेन परिवर्तितम्। एवं सर्वे परिसरप्राचार्याः परिसरनिदेशकाः सञ्जाताः। परिसराणां नामानि अपि केन्द्रीयसंस्कृतविश्वविद्यालयेति नाम्ना सह योजितानि भविष्यन्ति। एवं ३०.०४.२०२० दिनाङ्कात् अयमादेशः पूर्णरूपेण प्रभावितोऽभवत्। तः प्रभृति राष्ट्रियसंस्कृतसंस्थानं केन्द्रीयसंस्कृतविश्वविद्यालयेति जातम्।




संस्कृतस्य पुराऽऽसीद्यत्संस्थानं वै बृहत्तमम्।
केन्द्रस्य भाति तत्पुण्यं विश्वविद्यालयोऽधुना।। (अनिलः)

## परिसरे नूतनप्राध्यापकानामागमनम्



**डा.सच्चिदानन्दस्नेही–** अस्मिन् वर्षे 20.01.2020 दिनाङ्के श्रीरघुनाथकीर्तिपरिसरस्य न्यायविभागे डॉ. सच्चिदानन्दस्नेहीमहोदयः नवनियुक्तसहाचार्यत्वेन समागतः। तिरुपतिसंस्कृतविद्यापीठात्, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठाच्चास्योच्चशिक्षा सञ्जाता। अयं पूर्वं जे.एन.बी.आदर्शमहाविद्यालये (लगमा, दरभङ्गा, बिहारप्रदेशे) सहायकाचार्यरूपेणासीत्, अधुना परिसरस्य न्यायविभागाध्यक्षपदमयमलङ्करोति।



**डा.शैलेन्द्रप्रसादउनियालः–** श्रीरघुनाथकीर्तिपरिसरस्य वेदविभागे 14.01.2020 दिनाङ्के सहायकाचार्यपदे डॉ. शैलेन्द्रप्रसादउनियालस्य नियुक्तिः सञ्जाता। अस्य श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठाद् उच्चशिक्षा अभवत्। स च पूर्वम् अस्मिन्नेव परिसरे संविदाप्राध्यापकत्वेनाध्यापयति स्म, तथा अधुना च वेदविभागाध्यक्षरूपेणात्रैव विराजते।



**प्रो.विजयपालशास्त्री–** एते पूर्वं केन्द्रीयसंस्कृतविश्वविद्यालयस्य गरलीपरिसरे साहित्यविभागाध्यक्षरूपेण कार्यं कुर्वन्ति स्म। श्रीरघुनाथकीर्तिपरिसरे एतेषाम् आगमनं फरवरीमासस्य 20 दिनाङ्के अभवत्। सम्प्रति अस्मिन् श्रीरघुनाथकीर्तिपरिसरे साहित्यविभागाध्यक्षपदम् अलङ्कुर्वन्ति। एते न केवलं साहित्यशास्त्रमर्मज्ञास्सन्ति, अपितु व्याकरणशास्त्रस्य, आयुर्वेदस्यापि विज्ञाः सन्ति।

## साहित्यखण्डः

### शीतं नमन्ति के मुदा

प्रो. बनमाली बिश्वालः

शीतं हानिकरं प्रायो लाभकरं भवेत् क्वचित्।
केचित् शीतं शपन्त्यत्र शीतं नमन्ति के मुदा॥1॥
शीतन्तु वर्धयेत् कष्टं पद्यानिवासिनां कृते।
हर्म्यनिवासिनाञ्चैतत् सर्वथा मोदकारकम्॥2॥
सन्ति हृद्रोगिणः कष्टे शपन्ति श्वासरोगिणः।
उष्णकोप-पीडितानां रक्षणन्तु भवेद् ध्रुवम्॥3॥
यदि कार्यालये सेवा शीततापनियन्त्रिते।
सुखदञ्च भवेत् शीतं सर्वथाऽत्र न संशयः॥4॥
घटते विपरीतन्तु प्रायशश्श्रमजीविनाम्।
आदिनं विवशाः कर्तुं कार्यं शैत्ये जले स्थले॥5॥
शीतं गालीर्ददत्यत्र केचन मनुजाः पुनः।
शीतवासविहीना ये दरिद्रास्तु विशेषतः॥6॥
एकाञ्च शाटिकां धृत्वा स्नानार्थं विवशास्तु याः।
शुष्कीकरणक्लेशाय स्नानमेव त्यजन्ति ताः॥7॥
दरिद्रदुःखदं शीतं धनिनाञ्च सुखप्रदम्।
धनिदरिद्रयोर्मध्ये शीतं सिद्ध्यति भेदकम्॥8॥
खाद्यपेय-प्रियाणान्तु शीतं प्रमोदकारकम्।
खाद्यं जीर्णं भवेत् शीघ्रं जीर्णशक्तेः प्रवर्धनात्॥9॥
शीतेऽपि जठराग्निस्तु शान्तो न भवति क्वचित्।
बहिर्लोके तु वह्निश्च शीतकोपाद्धिकम्पते॥10॥
कलायसेवनेनात्र शीतं न्यूनीभवेत् पुनः।
एवं लाभकराण्यत्र शुष्कफलानि कानिचित्॥11॥
सुखदं चायपानन्तु शीतेऽत्र प्रायशो मतम्।
स्वर्गदं काफीपानञ्चेत् मद्यपानञ्च मोक्षदम्॥12॥
कुक्कुटाण्डं मुदा भोज्यं मद्यं मुदा पेयं पुनः।
उभयोः संयोगो यत्र स्वर्गसुखं न संशयः॥13॥
माघे वदरिकाफलं न भोज्यं मूलकं क्वचित्।
तयोस्तदैव प्राप्तिश्च प्रकृतेस्तु विडम्बनम्॥14॥
नवविवाहितानाञ्च शीतं स्यादुपकारकम्।
परं प्रौढ-दम्पतीनां प्रायः कलहकारकम्॥15॥
कार्यसम्पादनं शैत्याद् भवेत् क्लेशकरं यतः।
बालानां पालनं कोऽत्र कुर्यादित्यतपि संशयः॥16॥
जलं भीषयति स्नाने पाने च कष्टदं क्वचित्।
अग्निस्सुखकरश्शीते उष्णभोज्ये स्पृहा यतः॥17॥
शीतं कं बलवन्तं न बाधते पृच्छ्यते यदि।
कम्बलवन्तमित्येवमुत्तरं नु प्रसिद्ध्यति॥18॥
शीते चेद् गीयते गीतं शीतं न बाधते क्वचित्।
वादयन्तीह दन्तास्तु वाद्यं तत्र स्वभावतः॥19॥
शीतर्तुं शिरसा वन्दे हेमन्तपरवर्तिनम्।
सुखदुःखकरं वन्दे वसन्तपूर्ववर्तिनम्॥20॥

## वाग्देवी-समर्चनम्

प्रो. बनमाली बिश्वाल:

वसन्ते ऋतुराजे च कस्याः देव्यास्समर्चनम्।
नियतमुत्तरञ्चात्र वासन्तीति न संशयः ।1।
वासन्तीत्यभिधानञ्च देव्याः- कस्यास्तु युज्यते।
उत्तरमिदमित्थञ्च प्रायशोऽत्र न दृश्यते ।2।
वसन्तपञ्चमी ख्याता वसन्तस्य समागमे।
वाग्देवी-पदयोर्भक्त्या समर्चनं विधीयते ।3।
वासन्ती सा कदाचित् स्याद् भाषारूपिणी भारती।
ब्राह्मी सा ब्रह्मणः पुत्री चाथवा सहधर्मिणी ।4।
वीणाहस्ता जगन्माता कला-सङ्गीत-पोषिका।
देवी पुस्तकहस्ता च विद्यादात्रीति संज्ञिता ।5।
सा हंसवाहिनी देवी क्षीर-नीर-विवेकिनी।
फलदात्री यथायोग्यं नहि वन्ध्या सरस्वती ।6।
सन्ति नामान्यनेकानि वाग्देव्यास्तु विशेषतः।
नामस्वेषु प्रधानत्वात् सरस्वती महीयते ।7।
सरस्वान्सागरोऽर्णवश्चेत्यमरस्य शासनम्।
अन्वर्थनामयुक्तेयं ज्ञानसागरसम्मिता ।8।
सृ गताविति धातोश्च सरतीति सरो भवेत्।
वाग्विलासस्सरः ख्यातं तत्र वासात् सरस्वती ।9।
शास्त्रधीरिति नाम्नाऽपि सरस्वती प्रसिद्ध्यति।
गीर्वाग्वाणीति विख्याता वेदवाणी निगद्यते ।10।
श्वेतपद्मासना देवी कुन्देन्दु-हारमण्डिता।
ज्ञानप्रकाशरूपा सा जाड्यान्धकारनाशिनी ।11।
कवित्वप्रतिभादात्री वाणी-बुद्धि-विलासिनी।
कल्पलतेव कल्याणी कामदुघापि मोक्षदा ।12।
स्तोतुं शुक्लाम्वरां देवीं सर्वे सन्ति समुत्सुकाः।
आराधनेन यस्याश्च विद्या लोके प्रतिष्ठिता ।13।
विद्यास्थानानि शोभन्ते विद्यार्थिभिः सुसज्जितैः।
विद्यार्थिन्यश्च राजन्ते पीतवस्त्रैरलङ्कृताः ।14।
पुस्तकपूजनं दिव्यमनध्यायो भवेत् क्वचित्।
वाग्देवताऽशिषो लब्ध्वा ज्ञानं समर्ज्यते महत् ।15।
शिष्यैस्सम्पूजिता देवी गुरुभिरपि पूजिता।
लेखकैर्ग्रन्थकारैश्च ग्रन्थारम्भे समर्चिता ।16।
वक्तृभिश्श्रोतृभिः पूज्या कलाकाराभिनेतृभिः।
मूकं करोति वाचालमिति तथ्यं यथार्थकम् ।17।
सङ्गीतनिपुणैश्चात्र नृत्यवाद्यविशारदैः।
चित्रकारैः स्वकलायै कलादेवी समर्च्यते ।18।
एवं को वर्तते लोके यश्च नोपासते च ताम्।
वाणीविरहितः कश्चित् कथं वा स्यातुमर्हति ।19।
सैषा नदीह देवी वा भाषा वा पुस्तिकाऽथवा।
या वा का वा भवेन्माता सा तु सर्वोपकारिणी ।20।



## किञ्चित्तु लोका वक्ष्यन्ति

(कुछ तो लोग कहेंगे..)

संस्कृतानुवादकः
प्रो. बनमाली बिश्वालः

(किञ्चित्तु लोका वक्ष्यन्ति, लोकानां कर्म हि कथनम्
जहि व्यर्थासु वार्तासु क्वचित् नातिक्रमेदियं रजनी) - 2
किञ्चित्तु लोका वक्ष्यन्ति ....।
काचिद्रीतिर्जगतस्तु ईदृशी, प्रति-प्रभातञ्च सन्ध्याऽभवत्- 2
त्वं काऽसि, तव नाम किम्, सीताऽपि चात्र निन्दिताऽभवत्
तत्कथं संसारस्य वार्ताभिरार्द्रीभूते ते नयने
किञ्चित्तु लोका वक्ष्यन्ति, लोकानां कर्म हि कथनम्
जहि व्यर्थासु वार्तासु क्वचित् नातिक्रमेदियं रजनी
किञ्चित्तु लोका वक्ष्यन्ति.....।
अस्मांश्च ये परिहसन्ति, वयं विस्मृताश्चासु प्रमोदेषु-2
वयं तानपि निलीयमानान्,आयातोऽपश्यामश्चासु वीथिषु
इदं सत्यं मिथ्या वार्ता नास्ति, त्वं वद इदं सत्यमस्ति न
किञ्चित्तु लोका वक्ष्यन्ति, लोकानां कर्म हि कथनम्
जहि व्यर्थासु वार्तासु क्वचित् नातिक्रमेदियं रजनी
किञ्चित्तु लोका वक्ष्यन्ति....।

हिन्दी मूलम्- आनंद बक्षी

(कुछ तो लोग कहेंगे, लोगों का काम है कहना
छोड़ो बेकार की बातों में कहीं बीत ना जाए रैना ) - २
कुछ तो लोग कहेंगे...
कुछ रीत जगत की ऐसी है, हर एक सुबह की शाम हुई - २
तू कौन है, तेरा नाम है क्या, सीता भी यहाँ बदनाम हुई
फिर क्यूँ संसार की बातों से, भीग गये तेरे नयना
कुछ तो लोग कहेंगे, लोगों का काम है कहना
छोड़ो बेकार की बातों में कहीं बीत ना जाए रैना
कुछ तो लोग कहेंगे ...
हमको जो ताने देते हैं, हम खोए हैं इन रंगरलियों में - २
हमने उनको भी छुप छुपके, आते देखा इन गलियों में
ये सच है झूठी बात नहीं, तुम बोलो ये सच है ना
कुछ तो लोग कहेंगे, लोगों का काम है कहना
छोड़ो बेकार की बातों में कहीं बीत ना जाए रैना
कुछ तो लोग कहेंगे ....

## अनुचिन्तनम्

डॉ.अनिलकुमारः

श्रीमहेशं जपेन्नित्यं भक्तानां क्लेशनाशकम्।
ललाटे राजते यस्य चन्द्रोऽतीव मनोरमः।।1।।
लम्बोदरो हरेद्विघ्नं मूषकवाहने शोभितः।
विद्यारम्भे प्रसीदन्तु सर्वे भगवतीयुताः।।2।।
सरस्वती पवित्रं मे ज्ञानं नित्यं तनोतु च।
शुक्लवर्णा यथा पद्मे वसतु हृदये तथा।।3।।
गुरुज्ञानं महत्पुण्यं सर्वत्रज्ञाननाशकम्।
तस्मात्सदा हि कर्त्तव्यमादौ च जगुरुवन्दना।।4।।
मानवस्य मया जन्म श्रूयते द्विप्रकारकम्।
माता देहेन पुत्राणां राजतेऽवनिमण्डले।।5।।

आदौ देहेन यत्प्राप्तं पशुवत् किन्तु दृश्यते।
जन्म तु प्राप्यते नित्यं गुरूणामाशिषा यदा।।6।।
भिद्यते हृदयग्रन्थिश्चाज्ञानस्य विनाशने।
अतो ज्ञानमयं जन्म मन्ये श्रेष्ठतरं सदा।।7।।
ज्ञानस्य निर्मला ज्योतिर्वाल्मीकिकालिदासवत्।
आनन्दयति काव्येन सहृदया रसान्वितान्।।8।।
तस्माच्च सर्वदुःखानामज्ञानमेव कारणम्।
ज्ञानं शिवस्वरूपञ्च तं सदा भज मूढधीः।।9।।
आराधनाय गीतायां भगवान्मधुसूदनः।
महाभारतसंग्रामे अर्जुनमुपदिष्टवान्।।10।।
अहर्निशमज्ञानेन किं सुखमनुभूयते।
विनाशो नियतस्तत्र ज्ञानञ्चाविर्भविष्यति।।11।।
मानवस्य स्वभावेन दुःखितोऽयं कथं जनः।
स्वभावो हि मनुष्याणां कारणं बन्धमोक्षयोः।।12।।
ईश्वरस्य विचित्रेयं लीला संसारकारिणी।
जन्ममृत्युजराव्याधिसुखदुःखादि-धारिणी।।13।।
मोहयति तथैवेयं भ्रमरं कमलं यथा।
मृत्युं याति स तत्रैव मनुष्याणां च किं पुनः।।14।।
संसारस्य गतिर्नित्या चास्ति स्वार्थपरायणा।
मनसि न कथं याति भावना मातृवत्सला।।15।।
ज्ञानस्य चिन्तनं नित्यं मोक्षैकहेतुना यथा।
विद्यते विदुषां कालो नारायणे हि धीस्सदा।।16।।
रामायणस्य विज्ञानं राजतेऽप्यधुना कथम्।
मानवस्य मतिर्नित्या रागवैराग्यशालिनी।।17।।
ईश्वरे लीयते नित्यं निर्विकारेण योगिना।
भानुर्भाति यथा चन्द्रे तथैव योगिनां गतिः।।18।।
नव द्रव्याणि वै न्याये पदार्थाः सप्त सुस्थिराः।
गुणास्तथैव ते प्रोक्ता नूनमत्रैव किं पुनः।।20।।
चिन्तयामि कथं जीवैस्तत्त्वं नैवावधार्यते।
तत्त्वं हि सत्यज्ञानञ्च सर्वदुःखविनाशकम्।।21।।
अज्ञाने च सदा भाति जगन्नित्यमयोगिनाम् ।
जायते ब्रह्मणस्साक्षाज्ज्ञानपुण्याद्धि निश्चितम्।।22।।
यथा निशा मनुष्याणां भवति तामसी सदा।
तथैव मनुते योगी दिवसेऽपि चराचरे।।23।।
ज्ञानाद्धि दिवसो जातोऽज्ञानान्निशा च योगिनाम्।
येषां न विद्यते ज्ञानं तेषां किं वा प्रयोजनम्।।24।।

(अग्रिमाङ्के इतोऽग्रे)

## राष्ट्रचेतना

डॉ.अनिलकुमारः

भारतस्य प्रजा: पीडिता दुर्जनैः सज्जनैर्नन्दिता वन्दिता या सदा।
किं करोमि प्रिये! साम्प्रतं नेत्रयो: दृश्यते नो जलं पावयेत् येन ता:।।1।।
मानवानां व्यथा न: कथा जायते त्रायते नैव केनापि त्रस्तो जन:।
राष्ट्ररक्षा तदा भाति मे भारते भारती भूसुतै: पूजिता सा यदा।।2।।
वीरपुत्रा यदा यान्ति तद्रक्षणे तत्क्षणे शोभते भारतस्य प्रभा।
मातृभूमिश्च मे नाकतोऽपि प्रिया चिन्तने धारयेन्मानव: सर्वदा।।3।।
सर्वदा सौख्यदा निर्मला नो मतिर्धर्मयुक्ता तथा सज्जनै: सम्मता।
लोकलाभाय नित्यं भवेद्भावना, पावनं सच्चरित्रं पुन: भातु भो:!।।4।।
एकतो सर्वदा माति मे जीवने भारताय प्रभो! किं कृतं नो मया।
मातृभूमेर्यथा रक्षणे तत्परो वीरपुत्रो यथा सा गतिर्मे भवेत्।।5।।
किं विचारैस्सदा भाति मे कौशलं कर्मभि: पूजितो मानव: भो: सखे!।।
यत्प्रियं भारतं भारतं नो कथं भातु वै पावनं किञ्च विश्वतो महत्।।6।।
तत्सदा चिन्तनं तच्च कार्यन्तथा जीवने धारिते मातृभूरक्षणे।
मामि सत्यं शिवं सुन्दरं ते तदा राष्ट्रसेवा यदा साधिता मोक्षदा।।7।।

## गणेशवन्दना

डॉ.शैलेन्द्रप्रसादउनियालः

अगजाननपद्मार्कं गजाननमहर्निशम्।
अनेकदन्तं भक्तानामेकदन्तमुपास्महे।।
भज गणनाथं शिवाप्रभातं जगन्नाथमखिलाधारम्।
मासे भाद्रपदे त्वष्ट्म्यां कृष्णे कृष्णः समागतः।।1
सिते दले च चतुर्थ्यां देवः शिवाव्रतात्गणपतिराप्तः।
गजाननो वै सुदीर्घनासः शूर्पकर्णधरसूक्ष्मदृशा।।2
पश्यसि लाभं शुभसहितं त्वं रिद्धिसिद्धिदेवीयुक्तम्।
एकदन्तबहुदं तं भक्तास्सदा स्मरन्ति पदं प्राप्तुम्।।3
भजगणनाथं शुभलाभार्थं रिद्धिसिद्धिपतिमीशसुतम्।
लम्बोदरमिह वाक्पटुतार्थं रहस्यसिद्ध्यै स्मर नित्यम्।।4।।
चतुर्हस्त चतुरं चतुर्यदं चातुर्यास्यर्थं सुभजे।
गं गणपतये नमो नमस्ते गं गणपतये नमो नमः।।5।।
मूषकवाहन मनोऽभिराजतां सन्मार्गं नयतां सुखदम्।
विघ्नान्हर हरपुत्र त्वन्नो हरिरूपोऽसि जगन्नाथः ।।6।।
गणपतिरह मङ्गलकर्ता भक्तसुखदो भवभयहर्ता।
गुणदायक सुखनायक ते मुखमस्तु सदा शुभशिवधर्ता।।7।।
गुणलक्षणरूपं यः स्तोत्रं पठति भक्तिमान्।
सर्वसिद्धिकरो देवः सिद्धिं यच्छति वाञ्छिताम्।।8

## सरस्वतीवन्दना

डॉ.शैलेन्द्रप्रसादउनियालः

मातः सरस्वति शारदे चाज्ञानतापसारय।
नः पारय त्वं मोहतो भव शोकतस्त्वाधारय।।1।।
कोकिलकलाप्रदभूमिकाश्मीरे विलासिनि तारय।
कुक्कुटगले मधुवाक्प्रदायिनि शत्रुनाशिनि शाधि नः।।2।।
रम्यरामायणविधायिनि वेदवाक्यसुधानिधे।
जयकाव्यकारमतिस्थिते भो प्रज्ञतां प्रददातु नः।।3।।
वेदान्तध्यानविधायिनी चाज्ञानमाननिवारिणि।
तव जन्मवेला पावनी सुखदायिनी शुभपञ्चमी।।4।।
रघुनाथकीर्तिप्रकाशिनी त्वं पाहि नो जगदम्बिके।
विद्याविकासिनि वाग्विलासिनि त्राहि नश्चाज्ञानतः।।5।।

# परिसरीय-आचार्याणां वार्षिक शैक्षिक-प्रगतिविवरणम्

## 1. निदेशकानां प्रो. बनमाली-बिश्वाल-महोदयानां शैक्षिक-गतिविधयः

- 25-02-20 अन्ताराष्ट्रियसङ्गोष्ठ्यां (सर्वदर्शने) श्रीरघुनाथकीर्तिपरिसरे(देवप्रयागे) संयोजकत्वेन प्रास्ताविकभाषणं पत्रवाचकत्वेन चोपस्थितिः।
- 26-02-20 राष्ट्रियसङ्गोष्ठ्यां (वेदान्ते) श्रीरघुनाथकीर्तिपरिसरे(देवप्रयागे) संयोजकत्वेन प्रास्ताविकभाषणं पत्रवाचनं च।
- 28-02-20 अन्ताराष्ट्रियसङ्गोष्ठ्यां (व्याकरणे) श्रीरघुनाथकीर्तिपरिसरे(देवप्रयागे) संयोजकत्वेन, पत्रवाचकत्वेन चोपस्थितिः।
- 29-02-202 श्रीरघुनाथकीर्तिपरिसरे(देवप्रयागे) आयोजिते राष्ट्रियकविसम्मेलने संयोजनम्, काव्यपाठश्च।
- 11-13.2.20 सोमनाथ-संस्कृतविश्वविद्यालये अन्ताराष्ट्रिय-परिसंवादे विशिष्टव्याख्यानम्
- 12.02.20 सोमनाथ-संस्कृतविश्वविद्यालये परमानन्दशास्त्रिणः स्मृतौ समायोजिते राष्ट्रियकविसम्मेलने काव्यपाठः
- 01-03-20 राष्ट्रियसङ्गोष्ठ्यां (साहित्ये) श्रीरघुनाथकीर्तिपरिसरे(देवप्रयागे) पत्रवाचनं सत्राध्यक्षम्।
- 02-03-20 राष्ट्रियसङ्गोष्ठ्यां (वेदे) श्रीरघुनाथकीर्तिपरिसरे(देवप्रयागे) पत्रवाचनं सत्राध्यक्षम्।
- 06.03.20 श्रीजगन्नाथसंस्कृतविश्वविद्यालये द्विदिवसीय-वेदविभागीय-सङ्गोष्ठ्याम् सत्राध्यक्षरूपेणोद्बोधनम्
- 07.03.20 श्रीजगन्नाथसंस्कृतविश्वविद्यालये द्विदिवसीय-वेदविभागीयसङ्गोष्ठ्यवसरे समायोजिते राष्ट्रियकविसमवाये काव्यपाठः
- 22-03-20 संस्कृतं भारतमिति आमुखपटलसमूहे कोरोनोन्मूलनाय समायोजिते राष्ट्रियकविसमवाये काव्यपाठः
- 22-03-20 विश्वसंस्कृतकुटुम्बमित्यत्र कविपरिचयः सजीवव्याख्यानमालायां विशिष्टव्याख्यानम्।
- 05-07-20 खडगपुरमहाविद्यालये (उत्कलप्रदेशे) राष्ट्रियसङ्गोष्ठ्यां नूतनदलितसाहित्यं संस्कृतसाहित्ये च नूतनप्रवृत्तयश्चेत्यस्मिन् विषये मुख्यवक्तृत्वेनोपस्थितिः।
- 22-07-20 अन्तर्जालमाध्यमेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य(नवदेहली) 'एकेडमिककाउन्सिल' उपवेशवेने उपस्थितिः।
- 04-08-20 श्रीरघुनाथकीर्तिपरिसरे आयोज्यमाने संस्कृतसप्ताहस्योद्घाटने स्वागतारभाषणम्।
- 04-08-20 व्यासश्रीद्वारा (भुवनेश्वरे) आयोजिते अखिलभारतीयकविसमवाये बालकवितापाठः।
- 05-08-20 श्रीरघुनाथकीर्तिपरिसरे संस्कृतसप्ताहस्य तृतीये दिवसे 'अद्यतनसन्दर्भे व्याकरणशास्त्रस्योपयोगिता' इति विषयमाधारीकृत्य विशिष्टं व्याख्यानम्।
- 06-08-20 श्रीरघुनाथकीर्तिपरिसरस्य संस्कृतसप्ताहे आयोजितायां राष्ट्रियसङ्गोष्ठ्यां सत्राध्यक्षत्वेन, पत्रवाचकत्वेन चोपस्थितिः।
- 15-08-20 श्रीरघुनाथकीर्तिपरिसरे राष्ट्रियकविसम्मेलनस्य संयोजकत्वेनोपस्थितिः, कोरोनाविषये काव्यपाठश्च।
- 15-08-20 श्रीअरविन्दो आश्रमेण(पाण्डिचेरी) आयोजिते बालकवितापाठोत्सवे संस्कृतवालकवितापाठः।
- 18-08-20 राजकीयमहाविद्यालयस्य(वून्दी, राजस्थानम्) संस्कृतविभागेन आयोजितायाम् अन्तर्जालीयराष्ट्रियसङ्गोष्ठ्याम् आधुनिकसंस्कृतसाहित्ये समाजचित्रणं प्रासंगिकता चेत्यस्मिन् विषये व्याख्यानम्।
- 24-08-20 श्रीगुरुगोविन्दविश्वविद्यालये(गोधरा, गुर्जरप्रदेशः) संस्कृतकथानां परिवर्तितपरिप्रेक्ष्य इति विषये विशिष्टव्याख्यानम्।
- 25-08-20 संस्कृतभारतीउत्तराखण्डस्य राज्यस्तरीयसंवादे भागग्रहणम्।
- 05-09-20 श्रीरघुनाथकीर्तिपरिसरे शिक्षकदिवसोपरि व्याख्यानम्।
- 06-09-20 संस्कृतबालसाहित्यपरिषदः (पाण्डिचेरी) बालकथापाठोत्सवे कथापाठः।
- 12-09-20 भुवनेश्वरसंस्कृतपरिषदः द्विदिवसीयायां (12-13) राष्ट्रियसङ्गोष्ठ्यां कविसमवाये काव्यपाठः, भागग्रहणं च।
- 13-09-20 भुवनेश्वरसंस्कृतपरिषदः द्विदिवसीयायां (12-13) राष्ट्रियसङ्गोष्ठ्यां कविसमवाये काव्यपाठः, भागग्रहणं च।
- 14-09-20 हिन्दीपक्षस्योद्घाटनावसरे स्वविचारोपस्थापनम्।
- 29-09-20 पूर्णिमाइन्जीनियरिंगमहाविद्यालये (जयपुरम्,राजस्थानम्) आर्यभट्टस्य ज्योतिषशास्त्रे गणितशास्त्रे च योगदानमित्यस्मिन् विषये व्यख्यानम्।
- 02-10-20 एम-एस-बडोदरा विश्वविद्यालयस्य संस्कृतविभागेन अमृतवाणीपरिषदा (बालेश्वरम्) च आयोजितायामन्तर्जालीयराष्ट्रियसङ्गोष्ठ्यां संस्कृतसाहित्ये गान्धीति विषये मुख्यवक्तृरूपेणोपस्थितिः।
- 02-10-20 श्रीरघुनाथकीर्तिपरिसर मनःस्वापकौषधेरिति राष्ट्रियसङ्गोष्ठ्यां स्वविचारोपस्थपनम्।
- 04-10-20 लोकभाषाप्रचारसमितेः (पश्चिमबंगप्रदेशः) अन्ताराष्ट्रियकार्यशालायां मुख्यवक्तृरूपेणोद्बोधनम्।
- 06-10-20 संस्कृतबालसाहित्यपरिषदः (पाण्डिचेरी) बालकथापाठोत्सवे कथापाठः।
- 30-10-20 गुर्जरप्रदेशे पुर्णिमा इन्जीनियरिंग महाविद्यालये आर्यभट्टस्य ज्योतिषशास्त्रे गणितशास्त्रे च योगदानमित्यस्मिन् विषये विशिष्टव्याख्यानम् ।
- 31-10-20 सरदारबल्लभभाईपटेलमधिकृत्य बडौदास्थ-महाराज-सयाजिराज-विश्वविद्यालयस्य संस्कृतविभागेन तथा बालेश्वरस्थ-अमृतवाणी-प्रतिष्ठानेन समायोजिते राष्ट्रिय-कविसम्मेलने काव्यपाठः।
- 06-11-20 कानपुर-विद्यामन्दिर-महिला-महाविद्यालये आधुनिकसंस्कृत-कथासाहित्यम् नाट्यसाहित्यञ्च इति विषयमधिकृत्य विशिष्टव्याख्यानम् अध्यक्षीयमुद्बोधनञ्च।
- 13-11-20 साहित्य-अकादम्या दीपावली-पूर्वसन्ध्यायाम् आयोजिते राष्ट्रिय-कविसम्मेलनात्मके युवासाहिती-कार्यक्रमे काव्यपाठः।
- 27-11-20 उत्तराखण्ड-संस्कृत-अकादम्या आयोजिते कालिदास-सप्ताहमहोत्सवे कालिदासस्य काव्येषु अखण्डभारतस्य स्वरूपम् इति विषयमधिकृत्य विशिष्टव्याख्यानम्।
- 28-11-20 लखनऊस्थ-नवयुगकन्यामहाविद्यालये आधुनिकसंस्कृत-गद्यसाहित्यम् इति विषयमधिकृत्य विशिष्टव्याख्यानम्।
- 19-12-20 बडौदास्थ-महाराज-सयाजिराज-विश्वविद्यालयस्य संस्कृतविभागेन डा. कृष्णकेशवषडङ्गिनः व्यक्तित्वं कृतित्वमधिकृत्य समायोजितायां राष्ट्रिय-परिचर्यायाम् अध्यक्षीयमुद्बोधनम्।

## 2. डॉ. सच्चिदानन्दस्नेही

- 05-01-2020 सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य राष्ट्रियसङ्गोष्ठ्यां 'सांस्कृतिक चेतना के विकास में संस्कृत का अवदान' इति शीर्षकान्वितं शोधपत्रं प्रास्तौत्।
- 24-25-02-2020 राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य (देवप्रयागे) न्यायविभागे अन्ताराष्ट्रियसङ्गोष्ठ्याम् 'अद्यतनसन्दर्भे भारतीयदर्शनशास्त्राणां प्रासाङ्गिकता' इति शीर्षकान्वितं शोधपत्रं प्रास्तौत्।
- 27-28-02-2020 राष्ट्रियसंस्कृतसंस्थानस्य व्याकरणविभागे अन्ताराष्ट्रियसंङ्गोष्ठ्याम् 'व्याकरणशास्त्रपरम्परायां प्रो-बनमालीबिश्वालमहोदयानां योगदानम्' इति शीर्षकान्वितं शोधपत्रं प्रास्तौत्।
- 26-27-02-2020 राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) वेदान्तविभागे राष्ट्रियसङ्गोष्ठ्याम् 'शाङ्करवेदान्तस्य विकासे दर्शनान्तराणां प्रभावः योगदानश्च ' इति शीर्षकान्वितं शोधपत्रं प्रास्तौत्।
- 29-02-2020 राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) साहित्यविभागे राष्ट्रियसङ्गोष्ठ्यां '21वी शताब्दी के अभिनव दार्शनिक व्याख्याग्रन्थ' इति शीर्षकान्वितं शोधपत्रं प्रास्तौत्।
- 01-02-03-2020 राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) वेदविभागे राष्ट्रियसङ्गोष्ठ्यां 'वैष्णवधर्म एवं दर्शन की लोकप्रियता ' इति शीर्षकान्वितं शोधपत्रं प्रास्तौत्।
- 06-08-2020 राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) राष्ट्रियसङ्गोष्ठ्यां 'योगसूत्रेषु स्वास्थ्यसंरक्षणेपायाः' इति शीर्षकान्वितं शोधपत्रं प्रास्तौत्।
- 20-21-06-2020 असमविश्वविद्यालयस्य संस्कृतविभागे Sanskrit studies and incredible Bharatam इति विषयान्वितायां राष्ट्रियसङ्गोष्ठ्यां उपस्थितिः।
- 21-06-2020 मेदनापुरमहाविद्यालये mind,body, exercise and life style management in changing environment इति विषयान्वितायां राष्ट्रियसङ्गोष्ठ्यां उपस्थितिः।
- 21-06-2020 रामजयपालमहाविद्यालये (छपरा) various emerging theories of polity इति विषयान्वितायां राष्ट्रियसङ्गोष्ठ्यां उपस्थितिः।
- 08-10-06-2020 श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठे (नवदेहली) Disgn & develop: online Assessment इति विषयान्वितायां राष्ट्रियकार्यशालायाम् उपस्थितिः।
- 18-27-06-2020 कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालये (रामटेकः) online FDP Cum National level workshop on e-content Design & development and Delivery इति विषयान्वितायां राष्ट्रियकार्यशालायाम् उपस्थितिः।
- 20-24-07-2020 श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठे (नवदेहली) Disgn & develop: online Assessment इति विषयान्वितायां राष्ट्रियकार्यशालायाम् उपस्थितिः।
- 08-10-07-2020 श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठे (नवदेहली) educational philosophy and psychology in Sanskrit Vangmaya इति विषयान्वितायां राष्ट्रियकार्यशालायाम् उपस्थितिः।
- 18-24-09-2020 छकडामहाविद्यालये (नादिया) संस्कृतरिसर्चमैथाडोलाजी इति विषयान्वितायां राष्ट्रियकार्यशालायाम् उपस्थितिः।
- 01-02-08-2020 प्रभातकुमारमहाविद्यालय के-के-दासमहाविद्यालययोः (कोलकता) online teaching learning and evoluvation इति विषयान्वितायां राष्ट्रियकार्यशालायाम् उपस्थितिः।
- 12-17-10-2020 कर्नाटकसंस्कृतविश्वविद्यालये (कर्नाटके) one week online FDP Excellence in Creative teaching and research इति विषयान्वितायां राष्ट्रियकार्यशालायाम् उपस्थितिः।
- 18-27-10-2020 कर्नाटकसंस्कृतविश्वविद्यालये (कर्नाटके) वेदान्तपरिभाषाप्रत्यक्षखण्डः इति विषयान्वितायां राष्ट्रियकार्यशालायाम् उपस्थितिः।
- 02-04-08-2020 केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य संस्कृतसप्ताहे संयोजकत्वेनोपस्थितिः।
- 06-08-2020 केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य एकदिवसीयसङ्गोष्ठ्यां संयोजकत्वेनोपस्थितिः।
- 07-09-08-2020 केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य व्याख्यानमालायां संयोजकत्वेनोपस्थितिः।
- 21-09-2020 तः 10-10-2020 पर्यन्तं केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्यं Anti durgs Awareness program under NAPDDR, Govt. of India इति कार्यक्रमस्य संयोजकत्वेनोपस्थितिः।
- 26-11-08-2020 केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य सविधानदिवसस्य व्याख्याने संयोजकत्वेनोपस्थितिः।
- 11-06-2020 रामाबाईराजकीयमहिलामहाविद्यालयस्य(अम्बेडकरनगरम्) 'स्वच्छभारत श्रेष्ठभारत' कोविड-19 इत्यस्यां प्रतियोगितायां संयोजकत्वेनोपस्थितिः।
- 21-06-2020 शान्तारामभाऊघोल्प आर्ट, साइंस एण्ड गोतीरामभाऊपवांरकामर्समहाविद्यालययोः योगदिवसस्य प्रतियोगितायां संयोजकत्वेनोपस्थितिः।
- 21-06-2020 राजकीयमहाविद्यालयपनवारी (महोबानगरम्) इत्यस्य योगदिवसस्य प्रतियोगितायां संयोजकत्वेनोपस्थितिः।

## 3. डॉ. कृपाशंकरशर्मा

- 02-10-2020 मादकद्रव्यजागरुकप्रतियोगितायां भागग्रहणम्।
- 10-10-2020 अद्वैतमल्लबर्मनमहाविद्यालये (त्रिपुरायाम्) संस्कृतसंस्कृत्योर्विकासे त्रिपुरायाः योगदानम् इत्यस्मिन् विषये मुख्यवक्तृत्वेनोपस्थितिः।
- 05-08-2020 श्रीरघुनाथकीर्तिपरिसरे(देवप्रयागे) आयोजिते अखिलभारतीयकविसम्मेलने काव्यपाठः।
- 05-01-2020 मध्यप्रदेशलेखकसंघात् आचार्यब्रजबल्लभशर्मा इति संस्कृतसम्मानेन (2019 वर्षस्य) सभाजितः।
- 20-07-2020 राष्ट्रिय इन्दिरागान्धीपाण्डुलिपिमिशनद्वारा(नई दिल्ली) आयोजिते अन्तर्जलीयराष्ट्रियसम्मेलने उपस्थितिः।
- 01-03-2020 राष्ट्रियसङ्गोष्ठ्यां (साहित्ये) श्रीरघुनाथकीर्तिपरिसरे(देवप्रयागे) पत्रवाचनम्।
- 12-10-2020 तः17-10-2020 पर्यन्तं कर्नाटकसंस्कृतविश्वविद्यालये(कर्नाटके) आयोजितायां संकायसंर्वधनकार्यशालायाम् उपस्थितिः।

### 4. डॉ.अनिलकुमारः

- 25-02-2020 अन्ताराष्ट्रियसङ्गोष्ठ्यां (सर्वदर्शने) श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) पत्रवाचनम्।
- 26-02-2020 राष्ट्रियसङ्गोष्ठ्याम् (वेदान्ते) श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) पत्रवाचनम्।
- 28-02-2020 अन्ताराष्ट्रियसङ्गोष्ठ्याम् (व्याकरणे) श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) पत्रवाचनम्।
- 29-02-2020 श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) आयोजिते कविसम्मेलने काव्यपाठः।
- 01-03-2020 राष्ट्रियसङ्गोष्ठ्याम् (साहित्ये) श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) पत्रवाचनम्।
- 02-03-2020 राष्ट्रियसङ्गोष्ठ्याम् (वेदे) श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) पत्रवाचनम्।
- 20-07-2020 राष्ट्रियइन्दिरागान्धीपाण्डुलिपिमिशनद्वारा (नई दिल्ली) आयोजितायाम् अन्तर्जलीयराष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।
- 02-08-2020 अखिलभारतीयअमृतवाणीसेवाप्रतिष्ठानम् (बालेश्वरम् ओडिशाप्रदेशे) आयोजितायाम् अन्तर्जलीयराष्ट्रियसङ्गोष्ठ्याम् पत्रवाचनम्।
- 03-08-2020 श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) संस्कृतसप्ताहे सहसञ्चालकत्वेनोपस्थितिः।
- 04-08-2020 श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) संस्कृतसप्ताहस्य श्रीरघुनाथकीर्तिव्याख्यानमालायां सञ्चालकत्वेनोपस्थितिः।
- 04-08-2020 पुण्यश्लोकअहिल्यादेवीहोल्करशोलापुरविश्वविद्यालये आयोजितायाम् अन्तर्जलीयराष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।
- 06-08-2020 श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) आयोजितायाम् अन्तर्जलीयराष्ट्रियसङ्गोष्ठ्यां पत्रवाचनम्।
- 10-08-2020 तः 20-8-2020 पर्यन्तम् राष्ट्रियसंस्कृतमञ्चे आयोजितायाम् अभिज्ञानशाकुन्तलनाटकस्य (1,4 अङ्कौ) कार्यशालायामुपस्थितिः।
- 15-08-2020 श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) आयोजितस्य अखिलभारतीयकविसम्मेलने काव्यपाठः, सञ्चालनश्च।
- 17-08-2020 रा-सं-म- एवं महात्माफुलेमहाविद्यालये (अहमीदपुरं, महाराष्ट्रे) आयोजितायाम् अन्तर्जलीयान्ताराष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।
- 20-08-2020 रा-सं-म- एवं नौगोंग कन्यामहाविद्यालये (नौगोंग, असमे) आयोजितायाम् अन्तर्जलीयान्ताराष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।
- 22-08-2020 तः28-8-2020 पर्यन्तं रा-सं-म- एवं राहमहाविद्यालये (राह, असमे) आयोजितायां प्रायोगिकव्याकरणकार्यशालायाम् उपस्थितिः।
- 30-08-2020 रा-सं-म- एवं अत्तरास्नातकोत्तरमहाविद्यालये (अत्तरा, उत्तरप्रदेशे) आयोजितायाम् अन्तर्जलीयान्ताराष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।
- 03-09-2020 श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) आयोजितायामन्तर्जालप्रवेशपरीक्षायां (प्रा-शा-एवं शास्त्री) संयोजकत्वेनोपस्थितिः।
- 03-09-2020 तः 09-09-2020 पर्यन्तं रा-सं-म- एवं एस-एन-डी-टी- तथा एस-सी-बी-महाविद्यालये (मुम्बई, महाराष्ट्रे) आयोजितायां पाणिनीशिक्षाकार्यशालायामुपस्थितिः।
- 05-09-2020 रा-सं-म- एवं राजकीयसंस्कृतमहाविद्यालये (सोलन, हिमाचलप्रदेशे) आयोजितायामन्ताराष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।
- 05-09-2020 श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) द्वितीयक्रमे आयोजितायामन्तर्जालप्रवेशपरीक्षायां(प्रा-शा-एवं शास्त्री) संयोजकत्वेन उपस्थितिः।
- 10-09-2020 रा-सं-म- एवं कामरूपमहाविद्यालये (छमता, असमप्रदेशे) आयोजितायाम् अन्तर्जलीयान्ताराष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।
- 14-09-2020 हिन्दीपखवाडाकार्यक्रमे के-सं-वि-श्रीरघुनाथकीर्तिपरिसरे हिन्दीपखवाडा-उद्घाटनसत्रस्य सञ्चालनम्।
- 16-09-2020 तः 25-09-2020 पर्यन्तं श्रीरघुनाथकीर्तिपरिसरे(देवप्रयागे) आयोजिताया अन्तर्जालपरीक्षायाः ( शास्त्रीतृतीयवर्षस्य) सञ्चालकत्वेनोपस्थितिः।
- 19-09-2020 रा-सं-म- एवं जम्मूविश्वविद्यालये (जम्मूकश्मीरप्रदेशे) आयोजितायाम् अन्तर्जलीयान्ताराष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।
- 22-09-2020 रा-सं-म- एवं ज-ने-स्मारकमहाविद्यालये (महाराजगंज, उत्तरप्रदेशे) आयोजितायाम् अन्तर्जलीयान्ताराष्ट्रियसङ्गोष्ठ्यम् उपस्थितिः।
- 26-09-2020 रा-सं-म-भारत एवं प्रीहसिहानौकराजबुद्धिस्थिश्वविद्यालये (कम्बोडिया) आयोजितायाम् अन्तर्जलीयान्ताराष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।
- 26-09-2020 हिन्दीपखवाडाकार्यक्रमे के-सं-वि-श्रीरघुनाथकीर्तिपरिसरे हिन्दीसामान्यज्ञानप्रतियोगगितायाः सञ्चालनम्।
- 02-10-2020 तः04-10-2020 श्रीरघुनाथकीर्तिपरिसरे(देवप्रयागे) आयोजितायां राष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।
- 12-10-2020 तः17-10-2020 पर्यन्तं कर्नाटकसंस्कृतविश्वविद्यालये (कर्नाटके) आयोजितायां संकायसंर्वधनकार्यशालायाम् उपस्थितिः।
- 18-10-2020 माघकाव्ये राजधर्मपरिशीलनम् शोधपत्रप्रकाशनम् International Research Journal of Management Sociology and Humanities ISSN-2348-9359, Vol.11(online-www.IRJMSH.COM)।
- 23-10-2020 तः 29-10-2020 पर्यन्तं रा-सं-म- एवं सं-वि-चमनलालमहाविद्यालये (रुडकी, उत्तराखण्डे) आयोजिताया विभक्तिप्रकरणकार्यशालायामुपस्थितिः।
- 01-11-2020 रा-सं-म- एवं सोगरामहाविद्यालये (नालन्दा, बिहारप्रदेशे) आयोजितायाम् अन्तर्जलीयान्ताराष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।
- 16-11-2020 तः 14-12-20 पर्यन्तं जे- एन- यू- (नवदेहली)द्वारा आयोजितायां 'फैकल्टी-इनडेक्शन-प्रोग्राम' इत्यत्र भागग्रहणम्।
- 15-12-2020 के-सं-वि- श्रीरघुनाथकीर्तिपरिसरस्य स्वाध्यायकेन्द्रस्य समन्वयकपदग्रहणम्।
- 21-12-2020 कुरुक्षेत्रविश्वविद्यालये(हरियाणाप्रदेशे) आयोजितायाम् अन्ताराष्ट्रियसङ्गोष्ठ्याम् पत्रवाचनम्।

## 5. डॉ. शैलेन्द्रप्रसादउनियाल

- 25-02-2020 अन्ताराष्ट्रियसङ्गोष्ठ्यां (सर्वदर्शने) श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) पत्रवाचनम्।
- 28-02-2020 अन्ताराष्ट्रियसङ्गोष्ठ्यां (व्याकरणे) श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) पत्रवाचनम्।
- 26-02-2020 राष्ट्रियसङ्गोष्ठ्यां (वेदान्ते) श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) पत्रवाचनम्।
- 29-02-2020 श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) आयोजिते बहुभाषीयकविसम्मेलने काव्यपाठः।
- 06-08-2020 श्रीरघुनाथकीर्तिपरिसरे (देवप्रयागे) सस्कृतसप्ताहे आयोजितायाम् अन्तर्जलीयराष्ट्रियसङ्गोष्ठ्यां पत्रवाचनम्।
- 02-03-2020 राष्ट्रियसङ्गोष्ठ्यां (वेदे) श्रीरघुनाथकीर्तिपरिसरे(देवप्रयागे) पत्रवाचनम्।
- 02-03-2020 राष्ट्रियसङ्गोष्ठ्यां (वेदे) श्रीरघुनाथकीर्तिपरिसरे(देवप्रयागे) संयोजनम्।

## 6. डॉ.अरविन्दसिंहगौरः

- 13-03-2020 तः 13-05-2020 पर्यन्तं केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुक्तस्वाध्यायपीठेनायोजितायाम् आधुनिकविषयान्तर्गतकार्यशालायां शास्त्रीकक्षायाः इतिहाससम्बद्धकार्यं सम्पादितम्।

## 7. श्रीनवीनडोबरियालः

- 15-02-2020 तः 17-02-2020 पर्यन्तं राष्ट्रियसंस्कृतसंस्थानस्य(नवदेहली) त्रिदिवसीये आरयेण्टिशनकार्यक्रमे उपस्थितिः।
- 16-05-2020 तः 21-06-2020 पर्यन्तं 'एल-आई-एस- अकेडमी तथा एन-सी-एस-आई- नेटफाउन्डेशन' (बैंगलूर) इत्यनयोः संयुक्ततत्त्वावधाने अन्तर्जालीयसंकायसंवर्धनकार्यक्रमे उपस्थितिः।
- 26-10-2020 तः 30-10-2020 पर्यन्तम् थापरइन्स्ट्यूट आफ इनजीनियरिंग एण्ड टेक्नोलोजी इत्यस्य (पटियाला)'एडवांस इन रिसर्च स्पोर्ट सर्विस इन अकेडमीक लाइब्रेरी' कार्यक्रमे उपस्थितिः।
- 'इन्टरनेट एण्ड आई-सी-टी-स्कील रीकर्ड फार टीचर एण्ड स्टूडेन्टस् इन आनलाइनक्लास' इति पुस्तके वर्च्युअल एण्ड आनलाइन क्लासरूम डिजिटल रिसोर्सेज् इन्टरनेट लर्निंग एण्ड ओपन कोर्सवेअर इति नाम्ना स्वालेखः प्रकाशितः।

# प्रतिस्पन्दः

पत्रिकामिमामवलोक्यामन्दमानन्दमहमनुभवामि परिसरीयवार्ताभिस्सह अत्र चित्राणां वीथी मनोहरा भाति। सप्रमाणं सर्वाः सूचना प्रदत्तास्सन्ति। काव्यकौशलम् अत्र अत्यन्तमाह्लादकारि यथा वर्तते तथैव प्राध्यापकानां प्रगतिविवरणमपि रुचिकरं विद्यते। भाषाकौशलमत्यन्तं सरलं सुगम्यं च। मन्ये यथा अत्र सर्वं साधितं न तथा सामान्यतयावलोक्यते। अतः अस्याः पत्रिकायाः कृते मे शुभकामनाः। नित्यं संस्कृतस्येयं रघुनाथवार्तावलीपत्रिका संस्कृतजगति कीर्तिमाप्नुयादिति भगवन्तं रघुनाथं प्रार्थये।



डा.शिवदत्तआर्यः, शिक्षाशास्त्रविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः,
नवदेहली



# 'हर ब्लॉक में एक संस्कृत ग्राम बनेगा'

**सराहना**

- राष्ट्रीय संस्कृत संस्थान देवप्रयाग में नौ दिवसीय संगोष्ठी
- गोष्ठी में वेदों का अनुसरण करने पर दिया जोर

देवप्रयाग | हमारे संवाददाता

उच्च शिक्षा राज्यमंत्री डॉ. धन सिंह रावत ने कहा कि राज्य के प्रत्येक ब्लॉक स्तर पर एक संस्कृत ग्राम बनाया जाएगा। गांव के लोगों को संस्कृत में दक्ष किया जाएगा। कहा इसकी ...

समाधान किया जा सकता है। कार्यक्रम में राष्ट्रपति पुरस्कार प्राप्त प्रो. वेदप्रकाश उपाध्याय ने वैदिक वांगमय विष्णु तत्त्व पर व्याख्यान देते हुए कहा कि हमें वेदों का अनुसरण करना चाहिए। कार्यक्रम में प्रो. बनमाली बिश्वाल, प्रो. विजयपाल शास्त्री, डॉ. आर. बालमुरुगन, वेद विभागाध्यक्ष डॉ. शैलेंद्र प्रसाद उनियाल, डॉ. सच्चिदानंद स्नेही, डॉ. कृपाशंकर शर्मा, डॉ. अनिल कुमार, डॉ. वीरेंद्र बर्तवाल, ...

# श्रृंगार रस की कविताओं ने लूटी दर्शकों की वाहवाही

राष्ट्रीय संस्कृत संस्थान में हुआ बहुभाषीय कवि सम्मेलन

संवाद न्यूज एजेंसी

# राष्ट्रीय संस्कृत संस्थान को केंद्रीय विवि का दर्जा मिलने पर जताई खुशी

देवप्रयाग। राष्ट्रीय संस्कृत संस्थान को केंद्रीय विवि का दर्जा मिलने से राष्ट्रीय संस्कृत संस्थान के छात्र छात्राओं व शैक्षिक स्टाफ में खुशी की लहर है। केंद्रीय मानव संसाधन मंत्री डा. रमेश पोखरियाल द्वारा इस संबंध में संसद में रखे गए प्रस्ताव के सर्वसम्मति से पारित होने के बाद राष्ट्रीय संस्कृत संस्थान अब केंद्रीय विवि के तौर पर संचालित होगा। अभी तक संस्थान को मानित विवि का दर्जा दिया गया था। राष्ट्रीय संस्कृत संस्थान, संस्कृत के पहले केंद्रीय विवि के रूप में भी अस्तित्व में आएगा। राष्ट्रीय संस्कृत संस्थान के श्री रघुनाथ कीर्ति परिसर के प्राचार्य प्रो. केबी सुब्बारायुडु ने कहा कि केंद्रीय विवि का परिसर बनने का लाभ यहां अध्ययनरत छात्र छात्राओं सहित शैक्षिक व गैरशैक्षणिक स्टाफ को मिलेगा। वर्तमान में राष्ट्रीय संस्कृत का 13 वां परिसर उत्तराखंड के संगम नगरी देवप्रयाग में निर्माणाधीन है। देश में राष्ट्रीय संस्कृत संस्थान के लखनऊ व इलाहाबाद (उ प्र), भोपाल (मप्र), जयपुर ..., पुरी (उड़ीसा), कांगड़ा (हिमाचल प्रदेश), त्रिचूर ...(कर्नाटक), जम्मू (जम्मू व कश्मीर), अगरतला ... में स्थित हैं। ब्यूरो

# युवाओं में बढ़ते नशे पर जताई चिंता

## केंद्रीय संस्कृति विवि श्री रघुनाथ कीर्ति परिसर में हुआ वेबिनार

संवाद न्यूज एजेंसी

देवप्रयाग। केंद्रीय संस्कृत विश्वविद्यालय श्री रघुनाथ कीर्ति परिसर में आयोजित वेबिनार में देश ... बढ़ते नशे पर चिंता जताई गई। ...ओं ने खासतौर पर युवाओं में ... नशे की आदत को रोकने के ... ठोस कदम उठाने पर जोर ... परिसर निदेशक प्रो. केबी सुब्बारायुडु ने कहा नशा जिस तेजी से समाज में पांव पसार रहा है इसे रोकने के लिए सभी को मिलजुल कर प्रयास करने होगा। इस दौरान अध्यापकों, छात्रों और कर्मचारियों को जीवन में नशा न करने के लिए शपथपत्र भी भरवाए गए। वेबिनार में साहित्य विभागाध्यक्ष प्रो. विजयपाल शास्त्री, हंस फाउंडेशन के सर्जन डॉ. सुदर्शन गिरि गोस्वामी ...



वेबिनार में भाग लेते शिक्षक व छात्र।

प्रसाद उनियाल, डॉ. अरविंद सिंह गौर, डॉ. अनिल कुमार, डॉ. सुरेश ...

# उत्तराखंड के हर ब्लॉक में बनेगा एक संस्कृत ग्राम: डा. धन सिंह

संवाद न्यूज एजेंसी



राष्ट्रीय संस्कृत संस्थान में आयोजित वेद विभाग की गोष्ठी में बोलते उच्च शिक्षा राज्यमंत्री

# श्रृंगार रस... लूटी दश...

राष्ट्रीय संस्कृत संस्...

संवाद न्यूज एजेंसी

# केंद्रीय विवि का दर्जा मिलने पर शिक्षकों और छात्रों में खुशी

**खुशी**

- राष्ट्रीय संस्कृत संस्थान को मिला केंद्रीय विश्वविद्यालय का दर्जा
- अब स्वतंत्र केन्द्रीय विश्वविद्यालय के तौर पर कार्य करेगा संस्थान

देवप्रयाग | हमारे संवाददाता

राष्ट्रीय संस्कृत संस्थान को केंद्रीय विश्वविद्यालय का दर्जा मिलने पर परिसर के छात्र-छात्राओं व शैक्षिक स्टॉफ में खुशी की लहर है। केंद्रीय मानव संसाधन मंत्री डा. रमेश पोखरियाल निशंक की ओर से संसद में रखे गए प्रस्ताव के सर्वसम्मति से पारित होने के बाद राष्ट्रीय संस्कृत संस्थान अब स्वतंत्र केंद्रीय विवि के तौर पर काम करेगा।

देवप्रयाग स्थित राष्ट्रीय संस्कृत संस्थान के श्री रघुनाथ कीर्ति परिसर के ...

शैक्षिक व गैर शैक्षणिक स्टाफ को मिलेगा। अन्य केंद्रीय विवि बीएचयू, एचएनबी आदि की तरह राष्ट्रीय संस्कृत संस्थान दिल्ली व उससे देश में स्थित 13 परिसर काम कर सकेंगे। अभी तक संस्थान को मानित विश्वविद्यालय का दर्जा मिला था। राष्ट्रीय संस्कृत संस्थान ... रूप में


















